1 °न्त्या० C. 2 °षं G1, G2. 3 तान् G1, G2, J, K. 4 रथ० C, G1, G2, J. 5 ज्योति० C, G1, G2, J. 6 ज्योति० C, J. 7 °शाः B, G1, G2, J, K. 8 अस्तोममह G1, G2, J, K. 9 °न्वितायामे० G1, G2, J, K. 10 तत्र० G1, G2, J. 11 °न्वी० B, G1, G2, J, K. 12 °णमिति C, G1, G2, J, K. 13 अतनु० B. 14 Wanting in G1, G2, J, K. 15 °श्न्यो B; °श्विना G1, G2, J, K. 16 °यादि० C. 17 °ः G1, G2, J, K. 18 चैवम० K. 19 °यत्त C. 20 °भूरिति G1, G2; भूरितो J, K. 21 °णां न C, G1, G2, J, K. 22 °न्ता० C, G1, G2, J, K. 23 °न्ये G1, G2. 24 °त्त्र G1, G2, J, K.

अन्यत् प्रतिपदो नावमिकम् ॥ ३ ॥

अथैते ह्याविष्मतह्याविष्कृते ।
ह्याविष्कृतं पूर्वस्याह्न आर्भवचरꣳ स्थानापन्नं भवति ।
द्वितीयस्थानं च ह्याविष्मतम्, उत्तरस्य माध्यन्दिने सꣳहितं च ।
भागविलोपे भागसन्तानाय निकामयते ।
अपि चैवꣳ सती नेदीयसी ह्याविष्मतह्याविष्कृते भवत इति ।
जनुषैकचर्यावैहर्गणन्यायेन त्रैशोकवैखानसे जागतस्य भागस्यानुग्रहाय ।
अहीनान्तेष्वर्काश्विकीर्षिताः ।
सꣳरोधान्विह दीर्घतमसोर्कः ।
विपर्ययेणेतरयोरात्रिः ।
स यदेतास्वेवं स्वयोनिः ।
अथाप्येतौ धृतवत्यो दक्षितवत्योऽन्तेऽभिरूपा इति ।
ज्योतिष्टोमान्युक्थान्यहीनान्तेषु चिकीर्षितानि ।
एवं पथ्यावसानमिति ।
आयुषमुत्तरस्य द्वितीयं करोति ।
एते सप्रायाश्चिकद्रुका इति ।
बृहत्पृष्ठं बार्हतं तन्त्रं द्वितीयꣳ हि स्थानमापन्नमिति ।
उद्धरत्यन्तलक्षणानि—त्रिणवत्रयस्त्रिꣳशयोरन्वपार्यमुत्सेधनिवेधौ परि-
स्थानमिति ।
जरावोधीयमहीनेषु चिकीर्षितम् ।
एतच्छन्दोमसामेति ।
तद्यदुष्णिहि राथन्तरात् स्तोमाच्छुध्यमविच्यावयिषीत् ।
उद्धरꣳशीयं तैरश्च्यं वेति विचारयन्ति ।
पूर्वस्याह्न उक्थान्त इत्यब्रोद्धरꣳशीयम् ।
उपक्रमणीयमहरिति तैरश्च्यम् ।
अषोडशिका रात्रिः स्तोमसंज्ञात्वेनं, अषोडशिकौ ह्येवायुर्भवतीति ।

---

1 ०ष्मतं K. 2 ०चौंव० G1, G2, J, K. 3 ०सोक्तः B. 4 अभिपर्यय० B; विपर्येतर० G1; विपर्ययेतरे० G2. 5 ०स्वेवायु C, G1, G2, J, K. 6 स्वरसोनिः G1, G2, J; स्वरसोनिः K. 7 ०तामधृ० B. 8 ०तब्यो० B. 9 ०डते० G1, G2, J, K. 10 ज्यौति० G1, G2. 11 ०तत K. 12 तत्र B. 13 ०पन्ना इति. 14 त्रय is wanting in G1, G2, J, K. 15 ०पावायायु० B. 16 ०ध्या० B; सोमांशुध्यसवि० G1; सोमांच्छुध्यसवि० G2, J; ०मांशु० K. 17 विति J. 18 इत्यहो० G1, G2, J, इहो० K. 19 ०मं ह्या० B. 20 ०कावेण पो०. 21 ०कोऽग्रे० B, K.

" 'त्रिवृत्पञ्चदशोऽग्निष्टोमः ।' PB. 20. 13. 1.
उत्तरस्य पूर्वमेकस्तोमतामिवाह्नो दिदर्शयिषन्नायुषी प्रच्युतं पञ्चदशं पूर्वस्मिन्नह्न्यनुगृह्णाति ।
तत्र यदेतत् स 'रूक्षोऽभवत्' इति । PB. 24. 13. 2.
कपिवनो भायजात्यश्वातूरात्राय जामदग्नये दिदीक्षे" ।
ब्रह्मचारिणं सम्पन्नकुलीनमपः प्रहृत्य ।
तस्य त्रिवृतपञ्चदशमहरुपेतं बभूव ।
अथेतरस्तमर्थं साधयित्वा प्रत्याजगाम ।
सामायमिमंमहर्यागं निशीशमतेति ।
आयुरतिरात्रमुपदधौ, ब्रह्मचारिणश्च परिहारेण यज्ञप्रत्यवहारेण च रूक्षो बभूव ।
यस्त्वेतौ दोषौ परिहरेन्न रूक्षः स्यादिति ।" Caland PB. 20. 13. 4; cp. PB. 20. 13. 4, 5; ĀP. Ś. 22. 14. 20.
पूर्वेणैव द्रव्यकल्पो व्याख्यातो व्याख्यातः ॥ ४ ॥

द्वितीयः पटलः

अथातश्चिराह्नाः ।
तत्र वामदेव्यं तृतीये पृष्ठे करोति ।
लोकविधां त्रिरात्र उपकृतः ।
एतानि लोकेसामानीति ।
तानि कुशलं यद्यथाभक्ति निदधाति ।
तन्त्रेषु विप्रतिपद्यन्ते ।
आह्नीनिकतन्त्राणीति गौतमः ।
तद्गायत्रीभिर्विजानीमः ।
एकैकात्राह्नीनिकी भवति ।
'अस्य प्रत्नाम्' इति । SV. 2. 105; RV. 9. 54. 1.

---

1 पूर्व एक० C, K. 2 ०स्तोना० G1, G2, J. 3 ०वान्यो B. 4 निर्दिशयि० K. 5 ०षः B. 6 प्रच्यु G1, G2, J, K. 7 कषवनो B. 8 भाव० B. 9 ०श्चात्तरा० G1, G2, J; ०श्चतराय K. 10 ०न्न्यायय B. 11 ०क्षेद् B. 12 ०मिदहर्योगाद B. 13 शी० B. 14 Wanting in G1, G2, J, K. 15 चारू० B; च भरक्षदिति G1, G2; च भरूक्ष स्यादिति J, K. 16 G1, G2, J omit रूक्षो ... भ्र. 17 पूर्वे J. 18 In B only. 19 द्वितीये B. 20 ०ड G1, G2, J; ०ढं K. 21 लोके सा० C, G1, G2, J, K. 22 प्रत्ना B, C, G1, G2, J, K.

ता यत्करोति सहस्रवती सहस्रवंत्तद्भिरूपेति ।
एकाहिकानीति धानञ्जय्यः ।
तद्गायत्रीभिरेव जानीमः ।
एकैवाऽहीनिकी भवति ।

5 "प्र सोमासो विपश्चितः" इति । SV. 1. 478; 2. 114; RV. 9. 33. 1; PB. 11. 3. 1.
यंत् करोतिं प्रवत्युपक्रमेऽभिरूपेति ।
अहरहरेवाहीनैकाहाभ्यां वंर्तत इति शाण्डिल्यायनः ।
एवं युक्ता एता गायत्र्यो भवन्ति ।

10 अथ खल्वत्र भागविपर्ययो भवति ।
लोकविधां त्रिरात्र उपकृतः ।
तं यथाभक्त्यचिकीर्षीतं् ।
ते एते परेऽहनि भागविपर्ययाद् द्रव्यसमासेन वंर्तंते ।
द्वितीयेऽहंनि स्थानस्थानि द्वैतीयंकानि, भागान्वितानि तार्तीयिंकानि ।

15 एतदेव विपरीतम् ।
तृतीये खल्वत्र द्रव्यान्यक्षररूपाणि क्रियन्ते ।
प्रजापतेश्च वागक्षराण्यंक्षराक्षराणि च ।
आज्यादिषु प्रजापतैर्वागक्षराणि, यथोपलम्भमहर्स्संक्षराक्षराणि ।
एकाक्षरणिधनं यौधाजयम् ।

20 एष आचार्यसमयः ।
अथाप्याह—"यदाक्षंराणि प्रथममहर्भंजन्त" इति । PB. 21. 5. 4.
व्याख्याता अर्काः, तथाज्यदोहानि ।" cp. PB. 21. 5. 5.
पूर्वावर्कौ व्यत्यस्यंति" ।
अक्षरणिधनं प्रथमेऽहनि चिंकीर्षन्नाज्यदोहानां प्रथमं तृतीये ।

25 एवमिव ब्राह्मणं भवति—अथाप्येषामेतत् त्रिणिधनं तृतीयेऽभिरूपम् ।

---

1 सहस्रदत्तावभि० B; सहवत्तावभि० G1, G2, J, K. 2 C, G1, G2, J add तां. 3 सहस्रवती सहत्तावभि० G1, G2; सहस्रवती सं(०हस्र K)भत्तावभि० J, K. 4 अहरेकाहोनैकाहाभ्यां G1, G2, J; अहरहरेकाहीनैका० K. 5 पर्वत G1, G2, J, K. 6 ०न्नीति C, G1, G2, I, K. 7 ०र्धन् B. 8 ०या B, G1, G2, J, K. 9 द्रवालमासे G1, G2, J. 10 वर्त्तते K. 11 ०हस्रा C, G1, G2, J, K. 12 स्थानिस्था० G1, G2, J, K. 13 दि० K. 14 तार्तीयानि G1, G2, J, K. 15 ०ये मथ स्व० K. 16 वागक्षराक्षराणि C; वागक्षरा G1; वागक्षराक्षरा G2, K. 17 ०महःस्वक्षण्येका० G1, G2; ०महस्वक्षण्येका० J; ०महःस्वक्षरा अक्षम्येक्ष० K. 18 ०क्षाराणि C. 19 ०स्य व्यक्ष० C. 20 ०कीर्षि० J, K.

अनुष्टुभि प्रथमस्य करोति ।
अत्रैव सन्तानार्थानि भवन्ति ।
सन्तानार्थमिदं भवति ।
द्व्यक्षरणिधनत्वादनुच्छन्दसम् ।
इतरयोरैडमन्त्यं करोति ।
इडानुग्रहायं बृहतीं वा स्वेन सामान्तेनापिपादयिषीत् ॥ ५ ॥
उपवर्ती द्वितीयस्य प्रतिपन्नवमात् स्तोमान्विता ।
'कया ते अग्न अङ्गिरः'[11] इति होतुराज्यम् । SV. 2. 899; RV. 8. 84. 4.
केति तृतीयामिति हि भवति[13] ।
अथाप्यहि—"यत् साम स्तोमो भवति तदाज्येषु । निराह" इति । PB. 11. 2. 1, 2.
तां एतां[16] कवेयो यथा वामदेव्यस्यैचो दाशरात्रिकाण्युत्तराणि सन्तनीति[18] ।
स्वयोनीति[20] होतृकपृष्ठान्येतानि ।
छन्दोमब्यहे प्रायश्चित्तीयं गायत्रपार्श्वं मैत्रावरुणसाम ।
एतद् वामदेव्यसदृशम् ।
तत् खलु बृहतीषु करोति[24] त्रिष्टुभां बृहतीं पृष्ठेषु चिकीर्षन् ।
अथाप्यसिन्नक्षराक्षरं भवति ।
ककारपकारादिरकारः सन्तनि ब्रह्मसाम ।
'अस्तावि मन्म पूर्व्यम्' इति । SV. 2. 1027; RV. 8. 52. 9.
एता ब्रह्मप्रवादा इति ।
संकृत्यैश्छावाकसाम नवमाद् भागान्वितम् ।
अथ खल्वत्राँजामि भवति ।
लोकविधां त्रिरात्र उपकृतः ।
सम्मिश्रमाभ्यां लोकाभ्यामन्तरिक्षमिति ।

---

1 अनु प्र० C, K. 2 C omits सन्ताना० भवन्ति. 3 ०र्थानिदं G1, G2, J, K. 4 ०ग्रहो C; ०ग्रहोय G1, G2, J, K 5 जगतीं C, G1, G2, J, K. 6 ०न्ते तेना० G1, G2, J. 7 ०षत् B. 8 उपपदो B. 9 ०न्नस्य च पाद् G1, G2; ०न्नस्य वमाद् K. 10 भागान्विता C, G1, G2, J, K. 11 ०रसः C, G1, G2, J. 12 Wanting in G1, G2. 13 ०तीति C, G1, G2, J, K. 14 अथा प्रा० G1, G2, J, K. 15 Wanting in G1, G2, J. 16 ताः G1, G2, J, K. 17 आपत्यो B. 18 ०ष्यर्चो C, G1, G2, J. 19 ०नोति B 20 ऽस्वायानीति G1, G2, J. 21 ०त्रार्धे C 22 ०पार्श्व G1, G2, J. 23 ०ष्यं स० B. 24 करोतीनि B. 25 त्रिस्थानां C. 26 ०न्नवाक्ष० C. 27 सन्तन्यक्षा० C. 28 ०त्र जा० C, G2, J, खलुत्र० G1. 29 उपा० G1, G2, J.

पाञ्चमिकीं ककुभं करोति ।
तस्यामक्षराक्षरं भवति ।
ककारषकारादिरकारः पिपीलिकामध्यां करोति ।
षागुष्क्रोऽयं त्रिरात्रः ।
तत्रोभावाकारावनुष्टुभामचिकीर्षीत् ।
नावमिकीरुत्तराः ।
अक्षरसमासो हि तार्तीयिकेषु ।
तासां मध्यमामुद्धरति ।
दशरात्रलिङ्गेति ।
तत्रैतां करोति ।
'तꣳ सखायः पुरूरुचम्' इति । SV. 2. 1030; RV. 9. 18. 12.
एषा सखिमती यथा वामदेवस्यर्चः ।
ता यदावर्तयति परिवत्या प्रक्रमं परिजिह्वीर्षन् ।
नानाग्निष्टोमसामानि ।
नौनात्वावृत्ताथों नानाछन्दः ।
स्वावृत्तेष्वेवं भूयो नानात्वमिति ।
स यदिहानुष्टुभं करोति ।
बृहतीः कृत्वानुष्टुभा वेलेति ।
तत्रैतद् विशोविशीयꣳ स्वयोन्यापन्नं पुरस्तादेतत् स्थानम् ।
वाक्प्रवादोऽत्र भवति ।
भागान्वितान्युक्थानि ।
'होता देवो अमर्त्यः' इति । SV. 2. 827; RV. 3. 27. 7; 8. 19. 24.
तृतीयस्य होतुराज्यम्, हो इति तृतीयमिति हि भवतीति ।
गोषूक्तं प्रायश्चित्तिसाम ।
एतस्मिन्नक्षराक्षरं भवति ।
रेफादिरकारः सतोबृहतीं करोति ।
त्रिपदा त्रिरात्रेऽभिरूपेति ।
सत्रासाह्वीयं मैत्रावरुणसाम ।
एतद् वामदेव्यसदृशम् ।

---

1 एतस्यामक्षरं C, J, K; एतस्यमक्षरं G1, G2. 2 ०राऽनु० C; ०रानु० G1, G2, J, K. 3 ०क्षीषु C, G1, G2, J, K. 4 नानात्वार्थो C, K. 5 साबृ० B. 6 ०भूतो B. 7 ०भः C, G1, G2, J, K. 8 चो भवति Ck. 9 चार्क० B. 10 G1, G2. J repeat it. 11 गौ० B, K.

पुरस्तादेतत् स्तोभं बहिःसारम् ।
यथा वामदेव्यम् ।
वारवन्तीयमग्निष्टोमसाम ।
एतद् गायत्रीसामापन्नं पुरस्तादेतत् स्थानम् ।
वाक्प्रवादोऽत्र भवति ।
वागुक्तोऽयं त्रिरात्रः ।
अपि वानुष्टुभोपपत्त्या वाक्प्रवादेनानुग्रहो भविष्यतीति ।
अक्षरविक्रमेऽयं त्रिरात्रः ।
अपि वानुष्टुभोपपत्त्याक्षरप्रवादेनानुग्रहो भविष्यतीति ।
विद्वानविद्वानिति तु भवति ।
नानासाधुरयं त्रिरात्रः ।
तत्र नानर्त्विजोऽचिकीर्षीत् ।
कथमविद्वानृत्विक् स्यादिति त्वेवैतत् सदस्यानेव प्रतिग्राहकान् कुरुत
इति ॥ ६ ॥

राजयज्ञ उत्तरः ।
तस्य यदेवरविधोऽह्नर्योगः ।
एतान्यन्ताह्नानि, अन्तो हि राजेति ।
महानाम्नीमध्यमस्याह्नः पृष्ठं करोति ।
सर्वच्छन्दस्यास्ते ।
सर्वपशूनामालम्भो भविष्यतीति ।
अथाप्येता वज्रोक्ता राजयज्ञेऽभिरूपाः, वज्री हि राजेति ।
कथं धर्मा इति ।
कर्तव्या इत्येके ।
ते चैव करणवर्णा ये वज्रे ।
अपि चेह स्वस्थानतराः पृष्ठं च हि भवन्ति ।
अहीने च ।
अथापि यद्विदमिहाशान्तं क्रियते ।
सर्वपशूनामालम्भोऽयमिमेथिकाः पृष्ठविलोपः ।

---

1 अपु० C, उपुर G1, G2, K, उत्पुर J. 2 ०दो G1, G2, J. 3 ०क्के० G1, G2. 4 ०त्रे G1, G2, J. 5 ०पयत्या B; पथ्या G1, G2, J, K. 6 ०मो० B. 7 ०न्ति C. 8 ०र्थेत् B. 9 ०स्था० B. 10 ०भ्यन्तरानि G1, G2; ०न्यन्तो० K. 11 ०म्नि G1, G2, J, K. 12 ०न्दस्त्यासु C, ०न्दःस्यासु G1, G2, J; ०न्दस्यासु K 13 C adds न. 14 ०त्येते C. 15 C, G1, G2, J, K add तत्र. 16 ०मेधिकाः B; ०मैधिकां G1, G2; ०मैधिकां J.

तत्रापः शान्त्यर्थाः, ते क्रियमाणा बृहद्रथन्तरयोर्धर्मान् कारयेयुरिति ।
अथापि संयुक्तधर्मा इति ।
अथ बृहद्रथन्तरयोर्धर्मान्[2] कुर्युः ।
[महानाम्नीबलांस्तु[3] नूनम् ।][4]
महानाम्नीनां[5] धर्माः क्रियेरन्निति ।
अकर्तव्या इत्यपरम् ।
तथा ते[6] चैवाकरणवर्णा ये चंत्रे[7] ।
अपि च यः स्वाध्यायधर्मान्[8] प्रतीयात्[9] कृत्स्नान् प्रत्येतुमर्हतीति[10] ।
तेऽवेलायां नोर्ध्वं[11] माध्यन्दिनान् महानाम्नीभिः स्तुवीरन् ।
एका[12] वा द्वौ वा सम्प्रगायेतां नेतरे[13] शृणुयुरिति ।
एतान्येवमकुर्वतो[14] निर्वचनंस्वाध्यायधर्मः[15] ।
अथापि यो बृहद्रथन्तरयोर्महानाम्नीकारितान् धर्मान् मन्येत भूयश्चा-
लपीयसेऽनुसंहरेत् प्रत्यक्षे च परोक्षायानुचर्य्यं गमयेदिति ।
अतस्तत्पापीयो[21] बृहद्रथन्तरधर्मान्[23]कृत्वा महानाम्नीनां धर्मान् कर्त्तव्यान्
मन्येत ।
समानोत्पादानां[24] समानविधानानां[25] सतां[26] य एकान्[27] कुर्यात् ।
एकान् न किं[28] सोऽत ऊर्ध्वं न[29] व्यूहन्यात् ।
व्याख्याता अनुष्टुभः प्रतिपदश्चानुष्टोभे[30] ।
ताभिः प्रच्युतामुपवर्तीं[31] द्वितीयेऽहनि प्रतिपदं करोति ।
क्वचिन्तं प्रथमात् प्रच्युतं तृतीयेऽहन्यनुगृह्णाति ।
वामदेव्यं महानाम्नीभिः प्रच्युतं[32] स्वे स्थानेऽनुगृह्णाति ।
पार्थुरश्मं ब्रह्मसाम[33] ।
पङ्क्तिप्रतिभयोजना महानाम्न्यः ।

---

1 ०र्थं G1, G2, J, K. 2 ०र्धर्मान् G1, G2; र्धर्मांश्च J. 3 ०लानु C, G1, G2, J, K. 4 Wanting in B. 5 ०म्नीनां G1, G2, J. 6 व्य G1, G2 7 Wanting in G1, G2, J. 8 Wanting in B. 9 ये G1, G2; त्रे J, K. 10 ०ध्यायमतिवायाकृ० G1; ०ध्यायधर्मा तवायाकृ० G2; ०ध्यायधर्मांतवयाकृ० J, K. 11 प्रतिपदं B. 12 ०ंति B. 13 ते वे० C. 14 नोर्धस्तन्मा० C; नोस्ते मध्य० G1, G2, J, K 15 एका B. 16 इतरे G1; रेतरे G2, J. 17 ०वन्तो C, G1, G2, J, K. 18 ०नः स्वा० G1, G2, J, K. 19 भूयस्च० B. 20 या is wanting in G1, G2, J; ०क्षया० K. 21 C, G1, G2, J add यो. 22 बृहद् is wanting in G1, G2. 23 ०न् कृत्वा B 24 सामान्यो० G1, G2, J, K. 25 ०त्पादन०० G1, G2; त्पदाना०० J. 26 सतान् G1, G2, J. 27 एतान् B. 28 ः० C. 29 न्याद् C, G1, G2, J, K. 30 ०भेना० C, G1, G2, J. 31 प्रच्युता० G1, J. 32 बृहत्साम B.

एतत् पाङ्क्तं क्षत्रसाम, अथकारणिधनम् ।
ताभ्यां प्रच्युते सन्तनिनी माध्यन्दिनेऽनुगृह्णाति ।
आशीःसांमनी[1] मां प्रच्योषैतामिति ॥ ७ ॥

अथैतस्य पतन्तकस्य प्रथमेऽहनि वैष्णवीष्वनुष्टुप्सु पावमानीषु बहिष्प-
वमानं[2] कल्पयेदित्येक आहुः ।
एतत् प्रकृतौ दृष्टं भवतीति[3] ।
नैतदयुंक्षु स्तोमेषूपपद्यत इत्यपरम् ।
एतस्मिन्नेव बहिष्पवमाने गायत्रीः पावमानीरुपपेत् ।
एतदिह[5] ह्याविष्कृतं भवतीति[6] ।
चतुष्टोमकारितास्ता भवन्तीत्यपरम् ।
गायत्रीष्वेव कल्पयेदिति ।
अथ खल्वाह—एते एव पूर्वे अह्नी इति ।
तत्रैके पातन्तके प्रतियन्ति ।
एतं विधाय प्रदेशो भवतीति ।
प्रकृत्यपश्रया विकारा भवन्तीत्यपरम् ।
प्राकृतस्यैवाश्वमेधस्य प्रतीयादिति[11] ।
अथापि ते नानास्तोमाः ।
एकस्तोमोऽयं[12] भवति ।
तत्र स्वतन्त्रा एकाहाः स्युरित्येके ।
बहुधैकाहानां[13] स्वातन्त्र्यं दृश्यते ।
यथा—आयुष्कामे षड्रात्रेणेत्वरात्रयोरिति ।
त्रिरात्रतन्त्रा इत्यपरम्[14] ।
एवं च तन्त्राविलोपः । [15]cp. LŚ. 9. 11. 13.
अपि चैषोऽहीनन्याय इति ।
अपोऽशिके[16] गोआयुषी इत्यपरम् ।
एवं दृष्टे च, अपि चैवं प्रदेशो भवतीति ।
अथैष वैदत्रिरात्रः ।

---

1 ०सामनि B, ०सामानी C. 2 वा G1, G2, J, K 3 प्रकृतोयोन्द्रता० B, प्रत्येयाता० C. 4 ०नीनिर्वर्दिषु B. 5 ०मानिनं G1, G2, J. 6 ०क्तो B. 7 ०दृष्टुः C, ०दृक्षुः G1, G2, J. 8 ०दिशा G1, G2, J, K 9 हाविष्कृत G1, G2, J. 10 ०वति K. 11 ०स्यैवने प्र० G1, G2, J, ०स्यैवाने० K 12 ०मो यत् भ० C, G1, G2 J; ०मो यद् भ० K. 13 बहुष्वेका० B. 14 ०त्रे न० C, G1, G2, J, K. 15 त्रि is wanting in G1, G2, J, K. 16 ०को B. 17 वह्ने B. 18 ०स्य त्रि० G1, G2, J

तस्य त्रिवृत्स्तोमाः स्युः ।
षोडशिन उत्तमस्यातिरात्रस्य षोडशं प्रथमꣳ रात्रिपाम ।
एवं तावत् स्तोत्रीयो यथा त्रिरात्रः ।
नाना षोडशसामानि नानात्वार्थः ।
नानद् प्रथमः ।
उद्धꣳशीयं द्वितीयः ।
एतदानुष्टुभꣳ हरिवधोनि, यथा गौरीवितम् ।
तस्य स्थाने तैरश्च्यम् ।
एतत् पूर्वाभ्याꣳ सप्तायं न्यॉय्य उत्तमे षोडशिं ।
अथैत उत्तर एतान् कामान्नभ्युपकृताः ।
यथैतद् ब्राह्मणम् ।
स्तोमकारित आधायः ।
अन्तर्वसाग्रप्रत्यवरूढानि उत्तमस्याह्न उक्थानि ।
लोकविधां त्रिरात्र उपकृतो रोहोपकारः ।
अथाप्येवमव्याहृतꣳ सवनमिति ।
न्यायकृत उत्तरो न्यायकृत उत्तरः ॥ ८ ॥

तृतीयः पटलः

"अथैष चतुर्वीरो बृहद्रथन्तरपृष्ठ एव ।
न हि षाडहिकान्यनुभवन्ति ।
नान्यो व्यलुलुप्सीत् ।" Ārṣ. K. V. 74 b.
ते यज्ञानाछन्दस्सु ब्राह्मणेनैव तद् व्याख्यातम् ।
कानि तन्त्राणीति ।
चतुरहतन्त्राणीति गौतमः ।
तद् विजानीमः ।
चतुर्थेऽहनि चतुर्थप्रतिपदमादित्यैकाहतन्त्राद्राज्ञिमुपजिगमिषन्नस्य प्रजां करोतीति ।

त्रीण्यहीनिकानि ।
एकमैकाहिकमिति ध्यानञ्ज्यः ।
एवं पर्वणाहीनस्यानम् ।

---

1 स्तोमो C; °या G1, G2, J, K. 2 °शि° K. 3 नात्वा° G1, G2, J, K. 4 न्वाम्त B. 5 °श्च B. 6 एतां C. 7 उक्तको° B. 8 In B only. 9 नो B, K; नानो G1, G2, J. 10 Wanting in G1, G2, J. 11 °त्रैका° C, G1, G2, J, K. 12 °त्रैकैका° G1, G2, J. 13 पवणा° G1, G2, J. 14 °दनन्तम् B.

एकाह्नतन्त्रा[1]द् रात्रेरुपायः ।
स यदे[2]तदनन्ततन्त्रतरꣳ स्तोमकारित आवापः ।
उद्धरति जनुपैकच्चौ स्तोमकल्पार्थः ।
तत्र ज्योतिष्टोमौ[3] करोति ।
तयोः स्थाने नानोपवमानिकेभ्यो नानात्वार्थः ।
अथ यत्रा[4]यमर्थो भवति सामिकीं तत्र ककुभं करोतीति[5] ।
असञ्चाराय तत्र खलु पदꣳस्तोभान् करोति ।
चतुरो ऽयं[6] वीरानुपकृतः ।
त एते चत्वारः समानयोनयः समानार्षेयाः पुत्रामधेया गणेडा गणनिधनाः ।
अपि वा चातुर्वि[7]ध्यादेव क्रियेरन् ।
तारꣳस्तु यदेवं प्रयु[8]ङ्क्ते, एवमि[9]डान्तो रोहः ।
अपि चै[10]वं दाशरात्रिको ऽवसाने[11] भवतीति ।
तान् खल्वन्त्यान् करोति ।
अत्रै[12]षाꣳ स्वच्छन्द[13] इति ।
तत्[14] कुशलं[15] यन्नित्यासु ।
'धर्त्ता[3] दिवः[1][3]' इति । SV. 1. 558; 2. 578; RV. 9. 76. 1; PB. 14. 9. 4.
उत्तम पतासु स्वयोनिः ।
अथाप्येता अन्तलक्षणैः सम्पन्ना इति ।
व्याख्याता अर्काः ।
तेषां [16]तदे[17]वानुपूर्व्यं यत् त्रिरात्रे गो[18]पूंक्तं प्रायश्चित्तिसा[19]मं ।
पदस्तो[20]मबा[21]धितमर्कं द्विपदास्वनुगृह्णाति ।
तेन प्रच्युतꣳ वारवन्तीयमुष्णिह्यन्तसाम मा प्रच्यो[22]ष्टेति विपरिहरति ।
आनुष्टु[23]भेऽजाम्यर्थः ।
पतेनैवोत्तरे व्याख्याताः ।
उद्धरति पदस्तोभान् ।
न ह्येते चतुरो वीरानुपाकृताः ।

---

1 ०न्त्राया त्रे० G1, G2, J. 2 यदेतदेतत्तन्त्रान्तर० C, यदेनदन्तत्रतर० G1. G2. J, K. 3 ०म्यौ C, G1, G2. 4 नावमिक्यौ C, G1, G2, J, K. 5 यत्र षडहो० C, G1, G2, J, K. 6 ०रोति C, G1, G2, J, K. 7 पाद० B 8 B adds चतुरो. 9 ०र्विदध्या० K. 10 प्रयत्ना B. 11 ०डातो C, G1, G2, J, K. 12 ०त्रिकोव० G1, G2, J, K. 13 ०सानो C. 14 स्वं छन्द C, स्वंद G1, G2. J. 15 तान् C, G1, G2, J, K. 16 ०दत्वं B 17 धर्ना B. 18 धनदे० G1, G2. J यत्तदे० K. 19 गौ० K. 20 ०सामाः G1, G2, J, K 21 ०बाधम० C G1 G2 J,K

तत्र कुशलं यन्निल्यादिपदस्तोभापायादर्कः स्वꣳ स्थानꣳ समापद्यते ।
तस्यानुसमाप्तिꣳ शुध्यवारवन्तीये समापद्येते ।
अतो यो द्रव्यविकारः स्तोमैकारितः स भवति ॥ ९ ॥

अथ खल्वाह—"वसिष्ठस्य जनित्रे भवतः" इति । PB. 19. 3. 8; 21. 11. 3; LŚ. 9. 12. 8.

कस्येदं ब्राह्मणꣳ स्यादिति ।
बृहद्रथन्तर[योरविप्र]योगस्येत्याहुः, एते ह्यै विश्वोवसीयसी आजनित्रे भवत इति ।
अपि वा रथन्तरस्यैव द्वियोगस्यैतद्धि वासिष्ठेमिति ।
अपि वा रथन्तरस्यैव भवतश्च वासिष्ठस्य, एते वासिष्ठे भवत इति ।
जनित्रे एवानुकल्पयेदिति कौत्सः ।
जनित्रे भवत इति सति किमन्यदनुकल्पनात् ।
न त्वेवानुकल्पयेत् ।
न ह्येते आनवकाश्यान्नानुकल्पयतीति ।
एतेषामेव विचाराणामेकस्यैतद् ब्राह्मणꣳ स्यात् ।
एकस्तोमतामिवाह्नां दिदर्शयिषन्नुत्तमे भागस्तोमान् करोति, एते साꣳसि-स्थाना इति ।

पञ्चरात्रस्य चतूरात्रेणैव पृष्ठवादो व्याख्यातः ।
ते खलु स्वासु करोति ।
न ह्ययं चतुरो वीसंनुपकृतः ।
अथापि नानाभागश्चतूरात्रः ।
अथेह समानभागे चतुर्थपञ्चम इति ।
कानि तन्त्राणीति ।
पञ्चाहतन्त्राणीति गौतमः ।
तच्चतूरात्रेणैव व्याख्यातम् ।
चत्वार्याह्नीनिकानि ।

---

1 °वि° G1, G2, J, K. 2 °भापत्ति° G1, G2, J, K. 3 °थते B, G1. 4 स्तोभ° C; °स्तोमविकारः K. 5 J omits स्यादिति ··· बा रथन्तर (line 10). 6 योरविप्र is wanting in B. 7 °रेके B. 8 °स्य ह्यत° C; °स्यये ह्यत° G1, G2, J; °स्य चेह्यत° K. 9 एके B. 10 बा° B. 11 °त्सौ G1, G2, J. 12 °वां खेव C, G1, G2, J, K. 13 एवस्तो° G1, G2. 14 °वह्नां G1, G2, J. 15 सास° C, G1, G2, J, K. 16 यः सवनसाधु B. 17 °नुकृतः C. 18 येह G1, G2, J, K. 19 °ह्नमाह° K. 20 G1, G2, J add तं after °ह.

एकैमैकाहिकमिति धानञ्जय्यः ।
तत्तेनैव व्याख्यातम् ।
अग्निष्टोमः प्रथममहरुक्थानि मध्यः ।
दशरात्रन्यायेन यत्र संस्थाभिप्रयुज्यते, पर्वाभिप्रयुज्यते ।
उद्धरति षोडशिनं चतुर्थात् ।
"विराजमन्वपायꣳ स्वराजोपेयुः ।" Ārs. K. V. 112 b.
स्तोमस्य वा लोपात् ।
अथाप्येनमतिरात्रे करिष्यन् भवति ।
तंन्न संमविचारयिषीत् ।
उद्धरति आतीषादीयं धर्मिणि, तत् पुरा षडहे धर्मि भवति ।
तत्र याथान्तर्यात् क्रोशं प्रत्याहरति ।
अपि वा श्रुध्येन प्रच्युतमिहानुगृह्णाति ।
तदु भवत्यूर्ध्वेडं वार्हतेऽहनीति ।
स्तोमकारित आवापः ।
एतेनैवोत्तरो व्याख्यातः।
स्तोमकारित उद्धारः ।
सप्तदशꣳस्तोमं षोडशिनं करोति ।
यो वा ह्यहः स्तोमः स षोडशिनो न्यायेन ।
यो वा[हि भक्तिरेवमुत्पन्नो हि भवति ।
अथाप्यनादिष्टव्यूहेन भवति ।
अथ कथमहीनाह्नो रात्रेरितीति ।]
ह्रसीयानित्यहꣳः स्तोमं चैनंमनुयन्तं पश्यामः ।
अथाप्याह—सप्तदशꣳ स्तोमा नातियन्तीति।
व्रतासिमुत्तरꣳ उपकॢप्तः ।
स खल्वेकाहꣳकृतः ।
ते व्याख्याताः ॥ १० ॥

---

1 एवकामैका० G1, G2; एव कमैका० J, K. 2 मध्ये C, G1, G2, J, K, 3 ०स्थाहि प्र० B; ०स्थानि प्र० G1, G2, J, K. 4 एताहि प्र० B 5 ०नश्च० B. 6 विराजम० C, G1, G2, J, K. 7 सोम० K. 8 लोभाव C, G1, G2, J. 9 तत्त G1, G2, J; wanting in K. 10 समवैवि० C, G1, G2, J, K 11 उच्चार: G1, G2; उ र J. 12 ०शं C; स्तोमं is wanting in C, G1, G2, J, K. 13 ०शिकं B. 14 B omits हि ··· रात्रेरितीति (line 21). 15 ल्यहः C, G1, G2 J, K. 16 स्वे तम० C. 17 ०न्ती C, G1, G2, J. 18 ०रमुप० C 19 ०इव G1, G2, J, K. 20 खल्वेकाहा कल्पाः C.

"ऋतुपडहे कथं रात्रिरिति ।" Ārṣ. K. V. 111 a.
अकर्त्तव्येति शौचिवृक्षिः ।
एवमुत्पन्नो हि भवति ।
अथाप्यनादिष्टा व्यूहेन भवति ।
अथापि कथमहीनाङ्गो रात्रेरुपायो भविष्यतीति ।
अथापि कृत्स्नतायै वै नूनमिह रात्रिः क्रियेत, कृत्स्नोऽयं पडह इति ।
अथाप्येष चतुर्थो भागो रात्रेः प्रत्यर्द्धितामत्यक्रमिष्यदिति ।
"कर्तव्येति गौतमः ।" ibid.
आदिष्टा कल्पेन भवति ।
अथाप्येषाहीनसंस्था यां रात्रिस्तामवसानमूतां पष्ठमहरागच्छतीति ।
अथाप्येषोऽहीनन्यायः ।
सर्वेऽतिरात्रमन्तः ।
अथाप्यतिरात्रिकं व्रतम् ।
तस्यान्ते निपातात् रात्रिमुपधीयमानां पश्यामः ।
यथा सप्तरात्रेषु ।
अथापि यः पृष्ठ्यावलम्बस्य पञ्चमादहर्दिवसाद् रात्रिमपनयेत्, अर्धापायाद्व्यपायाच्च स्तोमप्रत्यवरोहम्, इहापि सोऽर्धागमाद्रात्रिं प्रत्येतुमर्हतीति ।
यद्येतदेवमुत्पन्न इति, अन्तवतो वै तत्र भवति, अन्तदर्शना रात्रिरिति ।
यद्येतदनादिष्टा व्यूहेनेति, नित्यत्वान्नूनमेनानादिशतीति ।
यद्येतत् कथमहीनाङ्ग इति, कथं वाऽप्यतिरात्रिकोऽभविष्यदिति, पश्यामश्चाहीनिकेभ्यस्तन्त्रेभ्यो रात्रेरुपायम्, यथा त्रिरात्रेषु ।
यद्येतत् कृत्स्नोऽयं पडह इति, कृत्स्नो ह्येवं पडहः रात्र्या तु कृत्स्नतरो भविष्यतीति ।

---

1 °प्यन्वादि° B, °प्यानादि° G1, G2, J. 2 व्यूहेनरार्थान् B. 3 °नानङ्गो° B. 4 °योऽभविष्यदिति C. 5 रात्रेः (रात्रिः G1, G2, J) कृत्स्ने तत् कृत्स्नोऽयं पडह इति अथाप्येष चतुर्थो भागो रात्रेः प्र° C. G1, G2, J. 6 °लम्बना° B. 7 °ने ष° G1, G2, J. 8 यद् C, G1, G2, J, K. 9 स्तोनवसानगतां B. 10 सर्वे ते रात्रिनतः C; सर्वे ते रात्रियतः G1, G2; सर्वे ते रात्रियता J; सर्वे ते रात्रि° K. 11 °प्य(प्या J)रात्रिकं C, G1, G2, J, K. 12 °लम्बनरत C. 13 °नादनादे° C, G1, G2, J, K. 14 °मुत° C. 15 °रोहः C. 16 अपि C. 17 अनन्ते C, G1, G2, J, K. 18 Wanting in G1, G2. 19 °दृव्यू° C, G1, G2, J. 20 °निकलसन्ते° G1, G2, J, K 21 दैव G1, G2, J, K. 22 °वारा G1, G2, J, K.

यद्वेतदर्कमिष्यदिति, अग्रं पवातिक्रान्तो भवति ।
अतिक्रामन्तं च पश्यामः ।
यथाग्नेर्यामे गौरीवितापायात् पृथक् स्वारणि [स्तोत्राणि] करोति
नानासाधुरुद्धीत इति ।

5 स यदेतान्येतानि रूपसम्पन्नानीति ॥ ११ ॥

आयुष्कामयज्ञ उत्तरः ।
तत्र त्र्यहौ समस्य निदधातीति ।
अहीनत्र्यहं चैकाहत्र्यहं च ।
कस्य हेतोरिति ।
10 "त्रयः प्राणापानव्यानाः" इति । PB. 22. 2. 3.
अग्निष्टोमसंस्थं ज्योतिषम् ।
पशास्य प्राकृती संस्था ।
अथाप्येतया संस्थया चरति ।
अथापि नानात्वमाचिमौ त्र्यहौ, तावुपक्रमसंस्थया प्राचिकमिषीतं ।
15 अपोडशिका रात्रिः स्तोमब्राह्मेण, अपोडशिको ह्येवायुर्भवतीति ।
द्वितीयस्याह्नो [वैसिष्ठं माध्यन्दिनान्त्यं स्यादिति शाण्डिल्यः ।
पङ्क्त्यर्थेनेदं पुरा प्रत्यवते नेह पङ्क्त्यर्थ इति ।
पार्थमेवेति गौतमः ।
एतत् समूहसाम, समूढावच्छेदोऽयं भवतीति ।
20 तृतीयस्यानुष्टुभि] बृहत् करोति ।
त्र्यहे सर्वे बृहद्रथन्तरे युयुक्षमाणः ।
अजाम्यर्थं वैवं स्यात् ।
पृष्ठ्यावलम्ब उत्तरः ।
तस्य पञ्चाह्नो बृहद्रथन्तरपृष्ठ एव ।
25 विश्वजिति हि पृष्ठानि करिष्यन् भवति ।
उद्धरति षोडशिनं चतुर्थात् ।
तत् पञ्चरात्रेणैव व्याख्यातम् ।
त्रयस्त्रिरात्रानि पञ्चमस्याह्न उक्थानि ।

---

1 °दर्क° G1, G2, K. 2 °ग्रह G1, G2, J, K. 3 अभिक्रा° B, C. 4 पष्ठवल्हा° K. 5 °राक् G1, G2, J. 6 B, K omit it. 7 °धुरहित G1, G2, J. 8 °ष्कामाना B. 9 G1, G2, J, K have इति for निदधाति ··· इति (line 7). 10 त्रानुप° C, G1, G2, J, K. 11 °मयि° B; °क्रमेयपीत्° G1, G2, J, K. 12 वासिष्ठं ··· °नुष्टुभि (line 20) wanting in B. 13 सर्वं C, G1, G2, J, K. 14 चैव C.

रात्रिकारितो हि स्तोमप्रत्यवरोहः ।
तान् विश्वजिति करिष्यन् भवति भवति ॥ १२ ॥

चतुर्थः पटलः

अथातः सप्तरात्राः ।
तत्र पृष्ठ्यं व्रतं सप्तमं करोति ।
एतदकृतं पृष्ठं भवति ।
अथाप्यनङ्गमेतद् व्रतस्य यदुक्थानि ।
तत्र ज्यौतिष्टोमानि स्वस्तोमान्याहरति, षोडशिमती रात्रिरहीनन्यायेन ।
अथाप्यनङ्गमेतद् व्रतस्य यद्रात्रिः ।
तत्र यैवं कृत्स्नतमा रात्रिस्तोमाहरतीति ।
सप्तदशमुत्तरस्य [व्रतम् ।
स्तोमकारित उद्धारः ।
तस्य स्तोमान्वयीत्युक्थानीति ।
किꣳ स्तोमानि स्युरिति ।
एकविꣳशस्तोमानीति गौतमः ।
एष एषां प्रकृतिस्तोमो भवति, तमन्वियुरित्येतत्स्यात् ।
सप्तदशस्तोमानीति धानञ्जय्यः ।
एषोऽस्य व्रतस्य स्तोमो भवति, तमन्वियुरित्येतत्स्यात् ।
पञ्चविꣳशस्तोमानीति] शौचिवृक्षिः ।
एष व्रतस्य प्रकृतिस्तोमो भवति, तमन्वियुरित्येतत् स्यात् ।
अथाप्येवं तासाꣳ स्तोत्रीयाणामनुग्रहो भवति यः पञ्चविꣳशाद् व्रतात्
सप्तदशे क्रियमाणेऽपयन्ति ।
द्वे पक्षस्तोत्रीये नानुगृह्येते ।
[ते] चेदनुजिघृक्षेत् त्रिणवं प्रथममुक्थं कुर्यात् ।
एकविꣳशꣳ स्तोमꣳ षोडशिनं करोति ।
एषोऽस्य प्रकृतिस्तोमो भवति ।
अथाप्येवं तासाꣳ स्तोत्रीयाणामनुग्रहो भवति यथैतच्छौचिवृक्षिरिति ।

---

1 in B only. 2 B adds इति. 3 तद० G1, G2. 4 ०कृष्टं K. 5 अनङ्ग० G1, G2, J, K. 6 B adds यद् व्रतस्य. 7 ज्यौतिष्टोमानः B 8 ०मति० B. 9 ०प्यभङ्ग० G1, G2. 10 ०येन G1, G2, J. 11 ०स्तमो ह० C; ०तमोह० G1, G2, J, K. 12 B has व्रतस्तोमान्वयानीति for व्रतम् । स्तोमा०…०स्तोमानीति (line 19). 13 Wanting in G1, J. 14 G1, G2, J add न. 15 G1, G2, J omit स्यात्. 16 ०ऽप G1, G2, J, K. 17 Wanting in G1, G2, J, K. 18 यः B. 19 द्विपक्ष० C, G1, G2, J, K. 20 Wanting in B, G1, G2, K. 21 ०शꣳ षो० C, G1, G2, J, K. 22 ०क्षे० B.

छन्दोमपवमानमुत्तरस्य व्रतम् ।
स्तोमकारित आवापः ।
अथ खल्वत्र विधर्माकरिष्यन् स्तोमशात्रेण कस्माद् धर्मं करोतीति ।
द्वन्द्वयोः साम्नोर्यथान्तर्यात् पूर्वमादत्ते ।
अथाप्येतस्याविकृतं निधनं भवति ।
अविकारः पूर्वो[3] विकारादित्येके ।
एकविंशान्युक्थानि ।
एकविंशस्तोमꣳ षोडशिनं करोति ।
तद् व्याख्यातम् ।
प्रथमे सप्तरात्रेऽभ्यास उक्तः ।
उत्तरस्य पञ्चाह्नो बृहद्रथन्तरपृष्ठः ।
चतुर्थस्याह्न एकविंशः षोडशी ।
"पञ्चमस्याहः पार्थस्य लोक आकूपारम्" वात्रेयं वेति विचारयन्ति ।
Ārs. K. VII 12 b.
नानापुरुषकल्पौ स्यातामिति ह स्माह धानञ्जयः ।
अन्य एवाँकूपारमरोचयिष्यत, अन्य आत्रेयम् ।
आत्रेयं चैवाभिरूपतरं पञ्चमेऽहन्नि स्थानसम्मितम्, पञ्चमस्याना अन्वय इति ।
चतुर्थस्याहः शुद्धाशुद्धीयस्य लोक आकूपारम् ।
पञ्चमस्याहः पार्थस्यात्रेयम् ।
पार्थं चैव नित्यम् ।
अहः पार्थं व्याख्यातम् ।
आत्रेयं नु खलु कुर्वत उभयोरनुग्रहो भवति ।
व्रते हि पार्थं करिष्यन् भवति ।
चतुर्विंशं यद्धिष्पवमानꣳ सप्तदशस्तोमं व्रतं करोति ।
तत्र त एवोक्थाना स्तोमविचारा यत् सप्तदशे व्रते ॥ १३ ॥

---

1 °दास्त G1, G2, J, K. 2 वि० G1, G2, J, K. 3 °र्वोऽवि० C. 4 °रिति C, G1, G2, J, K. 5 एवन्यकू० B; वाकू० G1, G2. 6 °रंरो० B; °रमिरो० C; °रमरोच० G1, G2, J. 7 °ने स० K. 8 आत्रेयमा० G1, G2, J; आत्रेयवा० K. 9 एवं B; यान् K.

अथ नवमः प्रपाठकः

अथ प्रतिष्ठाकामयज्ञ उत्तरः ।
स खल्वेकाहैकृतः ।
ते व्याख्याताः ।
जनकैसप्तरात्रे चत्वार्यहीनिकानि ।
अहानि आहीनिकतन्त्राण्यनन्तत्वात् ।
उद्धरति षोडशिनं चतुर्थात् ।
[तैद्] व्याख्यातम् ।
व्याख्याता अर्काः ।
तेषां तैदेवानुपूर्व्यं यत् त्रिरात्रे ।
'धर्ता दिवः' इति SV. 1. 558; 2. 578; RV. 9. 76. 1; PB. 14. 9. 4.

उत्तम एतासु स्वयोनिः ।
द्वितीयस्याहः सौभरम्, उक्थानां ब्रह्मसाम कुर्यादिति धानञ्जयः । cp. PB. 8. 8. 11.

नैकरुभं हि चतुर्थं करिष्यन् भवति ।
औपगवमेवेति गौतमः ।
अतिरात्रे सौभरं करिष्यन् भवति ।
एवमुभयोरनुग्रह इति ।
षोडशिमती रात्रिरहीनन्यायेन ।
अत्रैव चतुष्टोमः षोडशिमानिति शौचिवृक्षिः ।
शम्बूपुत्रो नात्र च, नेति राणायणीपुत्रः ।

---

1 in C only. 2 Wanting in C, G1, G2, J, K. 3 ०काहः C. 4 ०कारसप्त० G1, G2, K; ०का सप्त० J. 5 Wanting in B. 6 तदीयानु० B. 7 ०एवगव० G1, G2, J. 8 ०मति B.

पृष्ठ्यः स्तोम उत्तरस्य ।
षडहो बृहद्रथन्तरपृष्ठ्य एव ।
विश्वजिति हि पृष्ठ्यानि करिष्यन् भवति ।
चतुर्थस्याहः ।
'प्रत्यस्मै पिपीषते' इति SV. 1. 352; 2. 790; RV. 6. 42. 1.
गौरीवितꣳ षोडशिसाम ।
विराजमन्वपायꣳ स्वराजोपेयुः ।
पृष्ठापायद्रेवत्योऽपयन्ति ।
तत्रैतद् दार्ढच्युतमेतद् गायत्रीसामेहकारवत् पर्ण्यधनम् ।
यथा रेवत्यः ।
विपरिहरेदौदणो रन्ध्र इति गौतमः ।
एवमिडारम्भणा वृहतीति ।
न विपरिहरेदिति धानञ्जय्यः ।
अपि ह्येवमजामि ।
स किमर्थो नित्यं कल्पं व्यावयेदिति ।
अष्टरात्रेन्यायेन स्यात्, षोडशिका रात्रिश्चातुष्टोमन्यायेन ।
अथापि कृतः षडहे षोडशीति ।
आयुष्कामयज्ञ उत्तरः ।
"स यन्नवरात्रो नव प्राणाः" इति । cp. PB. 22. 12. 4.
त्रिकद्रुकानुपदधाति छन्दोमसाहस्यात् ।
अथाप्येत ऊनस्य पूरयितारः ।
षोडशिका रात्रिः[13] स्तोमसात्रेण, आषोडशिको ह्येवायुर्भवतीति ।
पशुकामयज्ञ उत्तरः ।
तत्र पञ्चाहं करोति ।
"पाङ्क्ताः पशवः" इति । PB. 22. 13. 3.
यदु विश्वजितं पाङ्क्तानि पृष्ठानीति ।
त्रिकद्रुकानुपदधाति छन्दोमसाहस्यात् ।
अथाप्येत ऊनस्य पूरयितारः ।
तान् पुरस्तात् पञ्चाहस्य करोति ।

---

1 °पृष्ठ C, G1, G2. J, K 2 पृष्ठानि C, G1, G2, J, K. 3 °जाम० C, G1, G2, J, K. 4 व is wanting in C. 5 षष्टिधनं G1, G2, J, K. 6 अपि प० B. 7 °म्भयोः C, K; °म्भयो G1, G2, J. 8 र्थं B. 9 °लय G1, G2, J; °ल्प K. 10 °रात्रस्याषो० C, G1, G2, J; °रात्रास्याषो० K. 11 °श्चतु० B. 12 पूरिता० G1, G2, J, K. 13 °रात्रस्तो० B. 14 पञ्चक्तानि C, G1, G2, J, K.

विश्वजित[1] हि राज्युपायं करिष्यन् भवति ।
आयुषोऽनुष्टुभि बृहत् करोति ।
त्र्यहे सामं बृहद्रथन्तरे युयुक्षमाणः ।
अजाम्यर्थं वैव[2] स्याद् वार्कजम्भं वेति विचार्यति ।
अथापि नैतारं स्वतन्त्रं स्तोमविधां बृहदापद्यते ।
तत्राकूपारं तृचसमाप्तये ।
तदेतन्नवमाद् भागान्वितम् ॥ १ ॥
अथैष दशरात्रैः बृहद्रथन्तरपृष्ठ एव ।
तत्र खलु विश्वजितं दशमं करोति ।
स खलु विश्वजित् क्रियमाणो दशमतन्त्रं प्रत्यूहति ।
तत् प्रत्यूढमानं पूर्वे तन्त्रे प्रत्यूहति ।
अत्र यदेवैकं पुरा सप्तमे कृतंतन्त्रं भवति तत् प्रचयते ।
अथैते पंचनवमयोस्तन्त्रं व्यत्यस्यति ।
षोडशाहिकैरयं स्तोमैरभिविधीयते ।
स त्रयस्त्रिंशं स्वतन्त्रमचिकीर्षीत् ।
तस्यैतरस्थानं परीतं भवति ।
अत्र खल्वयं सर्वो दशरात्रो नानातन्त्रो भवति ।
समूहतिं वार्हद्रथन्तरपृष्ठानिं नित्याभिः ।
अनित्यो[11] ह मात्रायामकरिष्यत्, अनित्यो ह्ययं दशगत्र इति ।
नित्यास्तु[12] चतुर्थपञ्चमयोर्जगत्योः ।
याश्चतुर्थे नित्याः सप्तमेऽहनि ताः करिष्यन् भवति ।
अतो नित्याः करोति ।
तद्वशेन पञ्चमे कुशलं यदनित्याः ।
त्रिष्टुभो[14] नित्याः ।
नित्यो एवाचिकीर्षीदित्यपरम् ।
नित्ये[16] तन्त्रेऽनित्यौ स्तोमौ ।
तत्र नित्यानित्यौ अभिरूपौः ।

---

1 °पायाय C, G1, G2, J, K 2 सामं B. 3 वैत G1, G2, J, K. 4 °त्रभवमाद् G1, G2, J. 5 °त्रे G1, G2, J. 6 कृतं तन्त्रं C, G1, G2, J. 7 पृष्ठ० B, G1, G2, J, K. 8 षाडहिकै० B; षोडशाहिक० G1, G2, J. 9 °वे G1, G2, J. 10 B adds नित्यान्. 11 °त्ये B. 12 °स्तु C, G1, G2, J, K. 13 यो नि० B; यनि० G1, G2, J, K. 14 Wanting in G1, G2, J, K. 15 °त्याभि G1, G2, J. 16 C, G1, G2, J. K add ह. 17 °त्याभि० G1, G2, J. K. 18 °पौ B.

यदु पंष्ठी उभयोरैनित्या ।
उभय१ ह्येव तत्रानित्य२ स्तोमश्चैव तन्त्रं च ।
नित्यास्तु परयोरह्नः ।
नित्याभिर्ह्येनस्य इयँहस्य समूहः ।[1]
नित्यस्तु नवमे ।
अन्तर्विधा हि दशमिकयः ।
विश्वजित्यन्तर्विधाः करिष्यन् भवति ।
तत्र कुशलं यज्ज्योतिष्टोमँयं करोति ।
तन्त्रान्विते च पृष्ठान्विते च ।
अथ खलु दीर्घतमसोऽर्कमष्टमेऽह्नि करिष्यन् भवति ।
अन्तसामान्त इति ।
तन्त्रस्थः स्वांशिरमर्कः ।
सप्तमे त्रय एव, एकोऽग्नेरर्कस्तन्त्रोंपेतः ।
तन्नवमेमहर्भवति ॥ २ ॥

अथ द्रव्यसमुद्देशः ।
यानि यथास्थानं व्याख्यानानि [तोंनि] यान्ययथास्थानं तैरेवाष्टभिः
पर्यायैस्तेषामन्वयं समन्वीक्षेत ।
नाना ब्रह्मसामानि नानात्वार्थः ।
इयैतनौधसवर्णानि वार्हद्रथन्तरपृष्ठयान् नानाग्निष्टोमसामानि नानात्वार्थः ।
पेडानि भूयिष्ठानि करोति ।
सामान्तस्य स्थानेऽन्तसामान्तम् ।
अथाप्येष तृतीयसवनसामान्तः ।
तमदिदर्शयिषीर्नोनाच्छन्दसि ।
एवंभूयो नानात्वमिति ।
तानीमानि सप्त छन्दाँसि नवाँहं नानुभवन्ति ।
तंत्र ककुभं च विराजं चोपप्रयुङ्क्ते ।
सा प्रायात् तानि कुशलं यद्रोहेण प्रयुङ्क्ते ।

---

1 षष्ठ C, षष्ठ G1, G2, — J. 2 ०यीर C, K; ०यरनि० G1, G2, J. 3 सोम० G1, G2, J. 4 बहस्य C, J, K; बथह G1, G2. 5 B repeats it. 6 नित्योऽस्तु C, G1, G2, J. 7 ०वि० B, G1, G2, J, K. 8 ०ष्टोम्यौ C, G1, G2, J, K. 9 स्व० C. 10 ०न्वयेतः G1, G2, J. 11 ०ममहर्हरति C; ०ममर्हति G1, G2, J 12 Wanting in B. 13 स्थानं तत्सा० C; स्थाने तं सा० G1, G2, 14 ०विष्यन्ना० B 15 ०सेऽयं भू० B; ०स्येवं भू० G1, G2, J, K. 16 C adds भवन्ति. 17 नव्याहन्ना-ङ्गानि । B; वाहता नु भवन्ति G1, G2, J, K 18 मत G1; तत्र G2.

'अग्न आयूंषि पवसे' इति SV. 2. 814, 868; RV. 9. 66. 19; PB. 6. 10. 1; 9. 8. 12.

प्रथमेऽहनि करोति ।
कस्य हेतोरिति ।
शुशुत्सद्यज्ञोऽयं भवति ।
सैषाग्नेयी पवित्राभिव्याहारा शुद्धयर्थेऽभिरूपा ।
[अथापि शश्वदिहाग्निष्टुतं तैत्तिरीया अधीयते ।
सैषाग्निष्टदनुग्रहाय स्यात् ।
स्वादिष्ठामार्भवीयाम्, एषा स्वादुमती पवित्राभिव्याहारा शुद्धयर्थेऽभिरूपा ।]
अथाप्यैकाहिकी भवति ।
अथ खल्वत्र पौष्कलं भवति ।
शुद्धस्यैतद् भवति यत् पुष्कलमिति ।
अथाप्यैकाहिकमेकाहसमासं शश्वदिह तैत्तिरीया अधीयते ।
नाना मध्ये निधनानि न दाशरात्रिकाणि ।
मध्ये निधनान्यनु भवन्ति ।
अंतश्छन्दस्यान्युपप्रयुङ्क्ते ।
'आ सोम स्वानो अद्रिभिः' इति SV. 1. 513; 2. 1039; RV. 9. 107. 10.

तृतीयस्य बृहती सप्तदश साध्यासां करिष्यन् भवति ।
अत एतां करोति ।
एषां सामन्या तृचप्रथमा तृतीयस्थानेति ।
'बभ्रवे नु स्वतवसे' इति । SV. 2. 794; RV. 9. 11. 4.
षड्ऋचं षष्ठसप्तमयोर्विहरति ।
सन्तानार्थो नवर्चम् ।
एतस्य प्रथमेऽहनि तृचं हुतम्]
'उपास्मै गायता नरः' इति । SV. 2. 1. 113; RV. 9. 11. 1; PB. 6. 9. 1; 16. 11. 2.

---

1 शिशुः सधोशोऽयं C; शिशुत्सधोशायं G1, G2, J; शिशुत्स० K. 2 B omits अथापि ··· भिरूपा (line 10). 3 पठिता० C. 4 शुद्धय० C, G1, G2, J, K. 5 ०तोयका B. 6 मध्ये-C. 7 मध्ये-C. 8 अछन्द० G1, G2; अंतछन्द० J; अवछन्द० K. 9 पप्रयुङ्क्ते ··· हुतम् (line 26) is wanting in B. 10 एषां G1, G2, J, K. 11 ०मान्या G1, G2, J, K. 12 वे स्था० G1, G2, J, K.

व्रत्यं॑ सप्तमस्य समूढाज्यम् ।
एतत् स्थानंसम्मितम् ।
छन्दस्ये उत्तरयोः ।
एते रूपसम्पन्ने इत्येते रूपसम्पन्ने इति ॥ ३ ॥

5 पंचमः पटलः

अथैष कुसुरुविन्दः ।
तत्र खलु बृहद्रथन्तरे॑ करोति ।
राथन्तरवार्हतौ ह्येते स्तोमा इति ।
कानि तन्त्राणीति ।
10 दशरात्रस्तोमविकृत इत्येके ।
द्वैपृष्ठ्याद् द्वे तन्त्रे स्यातामित्याचार्याः ।
प्रथमद्वितीययोरिति शौचिवृत्तिः ।
एँते आहीनिक इति ।
तद्विदं प्रथमतन्त्रं प्रवतीभिः कृतमपरूपम् ।
15 अन्यत्रोपक्रमाद् व्यत्यसिष्य॑स्तु भवति ।
तस्य स्थाने ज्यॅोतिष्टोमं करोति—प्रथमस्य प्रथम॑ राथन्तरस्य राथन्त-
रमिति ।

एकॉहिके इति धानञ्जय्यः ।
एवमॅपर्वविलोप इति ।
20 तद्विदं॑ गोस्तन्त्रमन्तविं॑धाभिः कृतमपरूपम् ।
अन्यत्रान्ताद्व्यत्यसिं॑ष्य॑स्तु भवति ।
तस्यं॑ स्थाने द्वितीयतन्त्रं करोति—
द्वितीयस्य द्वितीयं वार्हतस्य वार्हतमिति ।
स खलु दशमेऽहनि द्वितीयतन्त्रमुखृत्य तस्य स्थाने ज्योतिष्टोमं॑ करोति,
25 एकाहतन्त्राद्रात्रिमुपजिगमिषन् ।
उँक्तो द्रव्यागमः ।
समेषु स्तोमेषूभयोस्तन्त्रयोः पुनानां बृहतीं करोति ।
उभयोर्ह्यॅपां॑ निर्ह्येति ।

---

1 व्रत॑ G1, G2, J, K. 2 ०नं स० G2, G2, J, K. 3 In B only. 4 C adds वै. 5 ०तानि० B. 6 ०ष्टया B, K; ०ष्टवे G1. 7 अते C. 8 G1 omits प्रवतीभिः ··· गोस्तन्त्रं (line 20). 9 ०नुरू० K. 10 ज्यौ० C, G2, J, K. 11 एको हि B. 12 एवं प० B. 13 तन्विदं C. 14 ०विदधाभिः G1, G2. 15 ०शिष्य॑ C. 16 तत् B. 17 ०मा G1, G2, J. 18 उक्तौ G1, G2, J. 19 ०षां B, G1, G2, J. ०ता K. 20 इति B.

उष्णिक्ककुभौ चा ।
अपि समाने भवत इत्यपरम् ।
द्विरात्रन्याय इवेह भवति ।
द्वैतन्त्रेण द्वैपृष्ठ्येन ।
तत्र द्वैरात्रिक्य उष्णिक्ककुभः करोति ।
अथ यत्र राथन्तरस्यार्द्धस्तुचार्थो भवति, तद्यथादक्षतुर्वीरि व्याख्यातं तथा तत्र भवति ।
बार्हतेष्वद्धस्तु यौक्ताश्वद्धाविष्मते, अग्निष्टोमेषु द्धाविष्मर्तमौक्ष उक्थेषु मौक्षमुक्थसामेति ।
विभक्तान्युक्थानि ।
राथन्तराणि राथन्तरेषु ।
बार्हतानि बार्हतेषु ।
तदेवार्काणार स्थानं यद्दशरात्रे तयोः सत्रगतयोर्बार्हतस्य कविमन्तं पर्यासं करोति ।
कालेयमच्छावाकसाम ।
"अभिप्लवन्यायेनैकविरथोऽतिरात्रः ।" cp. PB. 22. 15. 5.
"य एकस्तोमानामुत्तमस्तस्य स्तोमान्वयी षोडशीत्यविचारमेकविरथः" ॥ ४ ॥ Ap. Ś. 22. 24. 7; Ārṣ. K. VIII. 9. K; cp. PB. 22. 15. 9.
अथैष छन्दोमवान् बृहद्रथन्तरपृष्ठ एव ।
तत्र खलु विश्वजितं दशमं करोति ।
स खलु विश्वजित् क्रियमाणच्छन्दोमान् प्रत्यूहति ।
ते प्रत्यूह्यमानाः पष्ठमहः प्रच्यावयन्ति ।
"पृष्ठ्यावलम्बस्य पञ्चाहः प्रथमस्याहः प्रत्तवद् बहिष्पवमानं पञ्चमस्याहः" । Ārṣ. K. VIII. 10 a.
" 'असृक्षत प्र वाजिनः' इति SV. 1. 482; 2. 384; RV. 9. 64. 4; cp. LŚ. 4. 8. 12.
अनुरूपैः" इति शाण्डिलायनः । PB. 13. 7. 5.
उपरिष्टादिमं नवर्चमावर्तयिष्यन् भवति ।
कथमकृतस्यावर्तन स्यादिति ।

---

1 G1, G2 omit ति ... तच (line 6). 2 वै प्र० B. 3 °त्रिक्य C, J, K. 4 °स्यान्यात्तुचार्थो B. 5 तद्यथा ° K. 6 °मतः ° J. 7 °रात्रि C, G1, G2, J, K. 8 °तमस्व J. 9 अपमच्छ० B. 10 °या G1, G2, J. 11 तं is wanting in K.

नवाहयोगा इमा भवन्तीति धानञ्जय्यः ।
कथमसमाप्तयिष्यन्नवाहं नवाहयोगाः कुर्यादिति ।
व्याख्यातः समूहः ।
'ऋतावानं वैश्वानरम्' इति SV. 2. 1058.
होतुरज्यम् ।
वैश्वानरीयस्य स्थाने वैश्वानरीयः ।
नैककुभे उत्तरयोः ।
एते रूपसम्पन्ने इति ।
उद्धरति काण्वरथन्तरम्, अजामि हैं भवति ।
तत्रैतत् सोमसाम ।
एवमिडारम्भणा वृहतीति ।
गौरीवितापायात् पृथक् स्वाराणि करोति नानासाधुरद्धीन इति ।
स यदेतान्येतानि रूपसम्पन्नानीति ।
प्रथममात्रेयं नमंसोपहत्यैतदु वृहद्वयोनि वार्हतेऽहनीति ।
स्थानसम्मिते उत्तरे इति ।
एते रूपसम्पन्ने इति ।
स्वाराणि नैकंकुभानि माध्यन्दिनान्यान्येतानि रूपसम्पन्नानीति ।
रैडानि जागतान्यार्भवान्यानि ।
इडांभक्षयो "हि छन्दोमा इति ।
स यदेतान्येतानि रथन्तरेवार्हतेडानीति ।
नवमेऽहनि दीर्घतमसोऽर्कमनुकल्पयन्त्येके ।
अहर्मात्रेण स यदनुष्टुभि ।
एतदस्य समूढे वौ न भवति ।
तेन्नाकूपारं वृचसमासये ।
अथ येनानुकल्पयन्ति बृहत्सां चैनुकृतं मन्यमानाः ।
यथा वैतदग्नेरर्कः ।

---

1 नवाहयोग ··· कुर्यादिति is wanting in G1, G2, तत्वाहयोगा J. K. 2 ०रीयम् C, J, K; ०रीय G1, G2. 3 काण्व० C, G1, G2. 4 हि C, G1, G2. J, K. 5 ०म्भणा संभरराया इ० G1, G2. ०म्भराय संभरराया इ० J, ०म्भणा समरंण्या इ० K. 6 ०रात्रेयं B. 7 तमहोप तत्र B. 8 त्रैटुभानि C, G1, G2, J, K. 9 ०तांन्यार्भवनि G1, G2, J; ०तान्यार्भवंत्रि K. 10 ०डामक० C. 11 ०त्रोभि B. 12 ०रे वा० B. 13 स्वानं for वा न in K. 14 तन्नाकू० C; तन्नकू० G1, G2, J. 15 वृ० C. 16 यादानु० B. 17 ०ग्नेऽर्कः C, G1, G2, J.

'सप्तमेऽह्नि कृताकृत इति समापद्यंते' । Dh. Dr. Ś. 9. 3. 4.
दशमेऽह्नि सामानि समूहेद्वाजेजिद् द्विपदास्वनुगृह्णाति संयुक्तमेतेनाह्ना भवतीति ॥ ५ ॥

कथं दशमधर्माः, मानसमिति
कर्तव्या इत्येके ।
तद् वोंह्यायत इति ।
अकर्तव्या इत्यपरम् ।
ऋचसमास्तथैवैनानुकल्पयन्ति ।
बृहत्यां वानुक्तं मन्यमानान् दशमं च ।
लुप्यश्चै दशरात्र इति ।
अथास्यं कृतेन विश्वजिता मानसमध्यशायिष्यत् ।
अथाप्यनुष्टुप्संयोजनास्ते ।
जागतमिदꣳ स्थानं भवति ।
अथापि सत्रोत्पादास्ते ।
अहीनोऽयं भवतीति ।
"अभिचर्यमाण यज्ञ उत्तरः ।" cp. PB. 22. 17. 3; Ap. Ś. 22. 24. 1.

स खल्वेकाहकृतः ।
ते व्याख्याताः ।
तस्य सवनभाजैः स्तोमाः संवनवद्भाजो वेति विचारयन्ति ।
एवꣳ सवनैस्तोमाः सम्प्रयुक्ता भविष्यन्तीति ।
"उक्थ्यस ꣳस्थं ज्योतिषं बृहत्पृष्ठं वार्हतं तन्त्रम् ।" cp. Ars K. V. 124a.

द्वितीयꣳ हि स्थानमापन्नमिति ।
तत्र यो द्रव्यविकार उक्थ्यत्वाच्च बृहत्पृष्ठत्वाच्च सं भवति ।
अपि च समन्तꣳ समन्तीकाराय ।

---

1 समापद्यन्ते C, K; सम्पद्यन्ते G1, G2, J. 2 °हा° B. 3 °जद्ध B; °जदि G1, G2, J. 4 व्यहर्जा° B; व्यहद्धा° G1, G2, J, K. 5 °न C, G1, G2, J, K. 6 ऋच ... °मानान् is wanting in C, G1, G2, J, K. 7 °नानुक्त° is suggested 8 दच द is wanting in B. 9 °प्यक्ष° C, G1, G2, J, K. 10 जागत is wanting in J. 11 खल्वे° C, C1, G2, J. 12 सव° B. 13 °वस्तो° B, C, J, K. 14 सा(स C)मावद्° B, C, G2, J; समाः समावद्° G1. 15 °नाः स्तो° G1, G2, K. 16 सनं म° C, G1, G2, J, K. 17 उक्थसꣳस्था B. 18 तत्र B. 19 तत्र G1; तत्रं G2, J. 20 Wanting in G1, G2, J, K.

अथात एकादशरात्रः ।
दशरात्रान्ता अहीनाः ।
द्वादशाहप्रभृतीनि सत्राणि ।
किमेकꣳ स्थानमन्तरीयमिति वा ।
एकादशरात्रं करोति ।
"पृष्ट्यावलम्बस्य पञ्चाहः, पृष्ट्यस्तोमस्य षैष्टमहः" इति । Ārṣ. K. VIII. 11. H.
पयसा षष्ठमहरभ्यासं धृतिस्वरांदुक्तं पयोधा ।
अन्येवं द्वे बृहत्यौ स्वराबुक्तौ बृहतीतिं ।
"पुनः कण्वरथन्तरे स्वं लोकमेति" ।" Ārṣ. K. VIII. 11. H.
अजाम्यर्थं व्याख्याताः छन्दोमाः ।
दशमस्य स्थाने चतुष्टोमं करोति ।
कस्य हेतोरिति ।
छन्दोमस्य छन्दोमेमेत्यग्निष्टोमस्यात्यग्निष्टोमꣳ सꣳ रथन्तरपृष्ठो ज्योतिष्टोमतन्त्रो यथा दशममहरिति ॥ ६ ॥

अथ दशमयज्ञम्, मानसमिति ।
अकर्तव्या इत्येके ।
स्वेन नामधेयेनैकाह आदिश्यते ।
"चतुष्टोमोऽग्निष्टोमः" इति । ĀP.Ś. 22. 24. 11.
अथापि न दाशमिकं लिङ्गं दृश्यते ।
यथैतद् वह्निष्पवमानस्यावृत्तिः साम्नां विप्रच्यावंनमनुष्टुभः परोक्षीचिकीर्षेति ।
कर्तव्या इत्याचार्यः ।
येऽन्ये मानससंयुक्ताः सꣳस्थापनीयं तन्मानसं "चतुष्टोमोऽग्निष्टोमः" इति । ibid.

1 अथ ते G1, G2, J, K. 2 °रि० B; °रीया० K. 3 G1 adds षष्ठमस्य. 4 पृष्ठ० G1, G2, J, K. 5 °भ्या राजति स्व० C, °भ्यास जनिस्व० G1, G2, J, K. 6 स्वराड्डुक्तं B, K; स्व × × क्तं Cक; स्वरांदुक्तं Cख, G1, G2, J. 7 बृहद्दक् B. 8 स्वराद्धुक्ता B; स्वराड्डुक्ता G1, G2, J, K. 9 ति is wanting in Cक. 10 स्वल्पो० G1, G2, J. 11 °मिति C. 12 °मलय० B, मल्य० for छन्दोममेत्य० in G1. G2, J, K. 13 स उच्छन्दो रथ० C, G1, G2, J, K. 14 कथं दशमधर्मो मानसच्छन्दोमस्य छन्दोमवत्यग्निष्टोमस्यात्यग्निष्टोमꣳ स उत्तररथन्तरपृष्ठो ज्योतिष्टोमः कथं दशमधर्मो मान० C, G1, G2, J, K. 15 स्तेन G1, G2, J, K. 16 आशि० C, G1, G2, J. 17 विप्रस्यावन्नम० G1, G2, विप्रस्यावनम० J, K. 18 °युक्तेभ्यः C, G1, G2, J, K. 19 °नी B. 20 तन् is wanting in C, G1, G2, J, K.

अथाप्यकृत्तेन चिश्वजिता मानसमध्यशाययिष्यत् ।
अथापि सत्रोत्पादं नाहीनकृतावचिकीर्षीत् ।
दृश्यते चं दशममृते मानसात्, तथा मानसमृते दशमात् ।
न चैतद् दशमस्य यथा व्याख्यातम् ।
दशमसंयोजनास्तु कर्तव्याः ।
एष आचार्यसमयः ।
अथापि तन्त्रमद्दर्शने बलिष्ठं द्रुवते, उद्गाता स्वादिष्टे दाशमिक्यौ दृश्येते ।
अथापि स्थानेन भागागमेन तन्त्रोपधिना छन्दोभ्येनेति ।
स चैव चतुर्विंशो दाशमिकोऽन्ते दृश्यते ।
यद्येतत् स्वेन नामधेयेनैकाह्न आदिश्यते इति, बहुधैकाहः स्वेन नामधेये-
नादिश्यते ।
यथैष एवाश्वत्रिरात्रेऽभिष्टवे [चै] त्रिकद्रुका इति ।
अथैतानाहीनिकतन्त्रान् ब्रूमहे ।
यथो एतन्न दाशमिकं लिङ्गं दृश्यत इति, दृश्यत इति ब्रूमः ।
यथा व्याख्यातमस्थानं तु सामव्यूढस्य समूढो दशरात्रैः ।
दृश्यते च वह्निष्पवमानस्यानावृत्तिः ।
अन्यासु चानुष्टुप्सु दशमतन्त्रं यथा त्रिककुभः ॥ ७ ॥
तत् किम्प्रभृतयोऽहीना इति ।
उक्थप्रभृतय इति बह्वृचाः ।
तिस्रो मुहूर्तमात्रा अग्निष्टोमे स्तुतशस्त्रैर्नाभिविधीयन्ते ।
ता अद्यापि विधीयन्ते इति ।
शश्वद्रूपोऽग्निप्रभृतय एव भवन्ति ।
अत्रैष चतुर्थो भागः प्रथमं स्थानं लभते ।
सर्वे भागा आप्यन्ते सर्वे भक्ताः ।
यः स पुराह्नीनो भवति सोऽद्याहीन इति ।
शश्वद्रात्रिरात्रप्रभृतय एव भवन्ति ।
सर्वमादित्यचरितमभिविधीयते ।
उभौ वर्णौ प्रकृतिरेव ।

1 तद् C. 2 °योगास्तु C. 3 उद्गा-स्वा० C; उद्गता G1, G2, J. 4 °दृश्यते B, G1, G2, J, K. 5 स्थानभा० G1, G2, J. 6 भागमेन B. 7 °धेकाहाः C, G1, G2, K; °धिकाहाः J. 8 °न नादि० G1, G2; °नादिस्यते J; °ध्यन्ते K. 9 °तिरात्रे ब्रु० G1, G2, J; °त्रे ब्रु० K. 10 Wanting in B. 11 यतो B. 12 दृश्यत इति is wanting in C, G1, G2, K. 13 ब्रूमः G1, G2, J; ब्रूयाद् K 14 समूढेति B. 15 °त्रे G1. 16 °भिः G1, G2, J, K. 17 °त अभि० B. 18 कृतकृति० C, G1, G2, J, K.

अतऽ ऊर्ध्वं शश्वदङ्गद्विरात्रप्रभृतय एव भवन्ति ।
द्वे पृष्ठे चयाँ लभेते ।
द्वयान्यहानि राथन्तरवार्हतानीति ।
तदिदं बृहदतिरात्रे स्थानं तदन्यैस्थानं लभत इति ।
शश्वदङ्गत्रिरात्रप्रभृतय एव भवन्ति ।
एवमहर्भाजोऽहःसवनभागाः ।
स्वस्थानाँतिरात्रावनुष्टुविति ।
शश्वदङ्गचतूरात्रप्रभृतय एव भवन्ति ।
अत्रैष चतुर्थो भागोऽहर्भजते ।
यथा पूर्वे भागा इति ।
शश्वदङ्गपञ्चरात्रप्रभृतय एव भवन्ति ।
शुध्यत्युहैतच्चतुर्थमहः पञ्चमेऽहनि [रात्रिः सज्जत इति वा] ।
शश्वदङ्गषड्रात्रप्रभृतय एव भवन्ति ।
अत्रैष चतुर्थो भागो भूयिष्ठभाग् भवति ।
शश्वदङ्गसप्तरात्रप्रभृतय एव भवन्ति ।
आसप्तान् नानात्वाञ्चिवर्तन्ते,[10] नानासाधुरहीन इति ।
शश्वदङ्गाष्टरात्रप्रभृतय एव भवन्ति ।
शुध्यत्युहैतत् सप्तममहरष्टमेऽहनि रात्रिः सज्जत इति ।
शश्वदङ्गनवरात्रप्रभृतय एवं भवन्ति ।
अष्टरात्रे पुनरभ्युद्धृतेषु भागेषु जगत्यस्थाना भवति ।
साद्यस्थाना भवति साद्यस्थानं लभत इति ।
शश्वदङ्गदशरात्रप्रभृतय एव भवन्ति ।
एतद्धि परार्ध्यमहर्नानात्वं यदीदृशम्, नानासाधुरहीन इति ।
शश्वदङ्गैकादशरात्रप्रभृतय एव भवन्ति ।
शुध्यत्युहैतद् दशममहरेकादशेऽहनि रात्रिः सज्जत इति ॥ ८ ॥
अथायं द्वादशाहोऽहीनो भवतीत्र सत्रमिति ।

---

1 B adds वा अत. 2 लभते C, G1, G2, J, K. 3 ०दच स्था० C, G1, G2, J, K. 4 ०क्रयवि० G1, G2. 5 ०नावृत्रोचतुष्टु० G1, G2, J; ०नाहृत्राव० K. 6 शश्वदङ्ग० ... एव भवन्ति (line 11) wanting in G1, G2. 7 B omits रात्रिः ... वा. 8 ०त्रे प्र० J. 9 ०नि व० C, G1, G2, J, K. 10 ०ते B. 11 रात्र is wanting in G1, G2, J. 12 ०त्राहे० G1, G2, J, K. 13 सिध्यत B. 14 एवं J. 15 शश्वदङ्ग० ... लभत इति is wanting in G1, G2. 16 C, J, K omit साद्यस्थाना भवति. 17 अतद्धिप० C, G1, G2, J. 18 सद० B. 19 ०त्राहे० G1, G2, J, K 20 सज्यत B.

अहीनो भवतीत्याहुः ।
एको दीक्षेतेति भवति ।
अथाप्याहीनिकान्यहानीत्याचक्षते ।
दाशरात्रिकाण्यहानि ।
अथाप्याह—"यद् गौरीवितेनाहीनानीति ।" cp. PB. 11. 5. 15.
अथाप्याह—"यजमानमेवैतया वर्द्धयन्ति" इति । PB. 11. 11. 4.
अथापि वैरूपे वदति—यजमानं वानुप्रतितिष्ठन्तमुद्गाता प्रतितिष्ठतीति ।
अथाप्यस्मिन् दक्षिणाप्रवादो भवति ।
"ध्वस्रे वै पुरुषन्ती तरन्तपुरुमीढाभ्यां वैतदश्विभ्याꣳ सहस्राण्यदित्सताम्" इति । PB. 13. 7. 12.
दक्षिणावन्तोऽहीना इति ।
अथापि शश्वदनेनाश्वर्यवो याजमानं परिचक्षते ।
यथाहीनेनेति ।
सत्रमित्यपरम् ।
उभयतोऽतिरात्रो भवति ।
अन्यतरतोऽतिरात्रा अहीनाः ।
समाहितः प्रायणीयोदयनीयो भवति ।
व्यूढितप्रायणीयोदयनीयाः । cp. PB. 23. 1. 3.
अथाप्यन्वहं गौरीवितो भवति ।
नानास्वरा अहीनाः ।
अथाप्यस्मिन् सत्रवादरूपो भवति ।
यो वै देवानां गृहपतिं वेदसत्रे गृहपतिर्भवति ।
भारद्वाजायना वै सत्रमासत ।
स्तोमो युज्यते सत्रियेभ्यो गर्भः प्रतिष्ठायैव सत्रमासते ।
[अङ्गिरसो वै सत्रमासत ।]
गौपायनानां वै सत्रमासीनानां सꣳतः सत्रादुदस्थानो३ स्थिता३दिति ।
cp. PB. 13. 12. 5.

---

1 °नानि शश्वदङ्गत्रिरात्रप्रभृतय एव भवन्त्येवमहर्भाजोऽहःसर्वभागाꣳ स्वस्थाना रात्रावनुष्ठुविति शश्वदङ्गचतूरात्रप्रभृतय एव भवन्ति C, G1, G2, J; °नानीति शश्वदङ्गात्रिरात्रप्रभृतय एव भवन्त्यनित्यता K. 2 वेद° C, G1, G2, J. 3 अह° G1, G2, J. 4 परिचक्षे G1, G2, J. 5 °तोऽति° G1, G2, J. 6 °व्रा° B, C, °वाः प्रा° K. 7 व्याहित° B; व्याहिनि° G1, G2, J. 8 C, J, K add अहीनाः. 9 °भ्योऽहर्भ्यः प्र° C, G1, G2, J; °भ्योऽहर्भ्यः प्र° K. 10 B omits अङ्गिरसो ... °मासत. 11 यतः C, G1, G2, J, K. 12 °स्थाना सतो दि° B, °स्थाता C.

उभयं भवतीति लामकायनः, उभयथा ब्राह्मणं भवति ।
उभयथेष्टं वेद यत उभयेषामयं प्रत्ययः ।
तद्येऽस्मिन्नहीनवादाः प्रत्ययत्वात्ते भवन्ति ।
सत्रं तु भवति ।
सत्रकारोऽस्य भवति ।
नैवाहीनेन सत्रमित्यपरम् ।
तदप्येवमिव ब्राह्मणं भवति—"अन्यस्मै वै कामाय सत्रम्, अन्यस्मै यज्ञो न तत् सत्रेणाऽऽप्नोति, यस्मैकं यज्ञो न तद् यज्ञेनाऽऽप्नोति, यस्मैकꣳ सत्रम् ।" इति । PB. 22. 3. 2; 22. 10. 2; 23. 8. 2.
तद्यथाश्वत्थलो वृक्षो नैवाश्वत्थं इति वदनायनः ।
अनश्वत्थ इति ।
त्रयोऽहीना इति धानञ्जय्यः ।
एकाहाहीनोऽहीनाहीनः सत्राहीन इति ।
अयं ज्योतिष्टोमोऽतिरात्रः षोडशिमानेकाहाहीनः ।
[अत्र हि न] किञ्चनैकाहिकं कर्म हीयत इति ।
द्वादशाहोऽहीनाहीनः ।
किञ्चनाहीनिकमहर्हीयत इति ।
गवामयनꣳ सत्राहीनः ।
अत्र हि न किञ्चन सात्रिकमहर्हीयत इति ।
तदिदं कुशलोहिष्टमिति शाण्डिल्यायनः ।
यस्य स्यादहीनादहीन इति यस्य तु स्यादहर्वर्तयेति द्विरात्रात् प्रभृतयस्त-
स्याहीना इति ।
तदपि शश्वद् ब्राह्मणं भवति ।
प्रजापतिर्यज्ञक्रतूनसृजत ।
अग्निष्टोममुक्थ्यꣳ षोडशिनमतिरात्रम् ।
तमेते द्विरात्रप्रभृतयोऽहर्गणा ह्वयन् ।

---

1 यं त G1, G2, J, K. 2 सत्रंस्ते भ० B. 3 ०न्ति B, G1, G2, J. 4 ०होनोन B, G1, G2, J, K. 5 यत्तद० C; यतद० G1, G2, J. 6 यस्मैकं for यस्मैक in C. 7 ०त्यल K. 8 ०ने एकाहीनः G1, G2, J. 9 अत्र ··· न wanting in B. 10 Wanting in G1, G2 along with the next three lines. 11 ऽहीना is wanting in C. 12 अत्र हि न कि० C, K; न कि० J 13 सत्रमहीनः C, G1, G2; सत्रहीन J. 14 अत्र हि न is wanting in J. 15 कुशलो भूतयस्तस्याहीना इति तदपि शश्वद् ब्राह्मणं भवद् दिष्ट० C, G1, G2, J. 16 ०दहाना० B, K. 17 ०दहर्वर्त्तयेयेति C; ०दहवर्त्तयेति G1, G2, J, K. 18 ०त्रप्र० C, G1, G2, J, K. 19 य एतैर्द्वि० C.

तस्माच्चापि महासीरिति ।
तस्मादेतेऽहीना इत्यहीना इति ॥ ९ ॥

षष्ठः पटलः

अथातः सत्राणि ।
तेषां द्वादशाहः प्रथमः ।
तस्मिन्नुपकृतानि ।
तत्र द्वे उपधिस्थानेऽन्तरेणातिरात्रौ [च] दशरात्रं च यत्रैकेनाह्नार्थो भवतीति ।

मतमाहुरिति, एतदेकार्थं द्रष्टुमिति ।
तस्य तदेव स्थानं यत् संवत्सरे द्व्यहार्थे [गो°]आयुषी ।
तयोस्तदेव स्थानं यत्संवत्सरे त्र्यहार्थे त्रिकद्रुकाश्चतुरहार्थे मतचतुर्थान् पञ्चाहार्थेऽभिप्लवपञ्चाहाः षडहार्थेऽभिप्लवः सम्भवंते ।
एतेन न्यायेनैव एवोत्तरकल्पः क्रमते ।
आचत्वारिंशद्रात्रादुपचीयमानेष्वहस्तु रोहेणोपचयः प्रवर्त्तते ।
यत्र रात्रिसत्रन्याय इत्याचक्षते ।
यदेवापवदति तद् व्याख्यास्यामः ।
तत्रास्मिंस्त्रयोदशरात्रे कथं व्यूढसमूढौ ।
समूढः स्यादित्येके ।
समूढो ह्येनꣳ सर्वस्तोमोऽन्ववैतीति[12] ।
व्यूढः स्यादिति गौतमः ।
अनादिष्टः कल्पेन समूढः ।
अथापि छन्दोयोगपर्वणि भागसमस्तौ चोपधीयते ।
अथापि कृत्स्नोऽयं दशरात्र इति ।
व्यूढमेवैनꣳ सन्तꣳ समूढः सर्वस्तोमोऽन्ववैतीति ।
अथापि नादेक्ष्यत्[13] सोमसामें गौरीवितस्यादेक्ष्यत् ।
कथं दशमधर्मा मानसमिति ।
अकर्तव्या इत्येके ।

---

1 °देव ते° C. 2 In B only. 3 °त्रि° C. 4 Wanting in B. 5 °वति C, G1, G2, J. 6 °हरेति C, G2, J; °हेरति G1. 7 Wanting in B. 8 °वतः B. 9 अभिप्लवन्या° C2, G1, G2, J, K. 10 एकोत्त° C, G1, G2, J, K. 11 °यूहाविति C, J, K; °यूहादिति G1, G2. 12 °न्ववै° B. 13 °क्षत J. 14 °साम G1, G2, J, K. 15 °चोदे° G1, G2, J; °तं चादे° K.

दशमं च लुङ्धश्च दशरात्र इति ।
कर्तव्या इति गौतमः ।
अनाकृतेन व्रतेन मानसमाधिनाप्यते ।
अथापि वाचो दशाक्षरं मन उपकृतं कृत्स्नोऽयं दशरात्र इति ।
चतुर्दशरात्रे पृष्ठ्यꣳ रूढावृत्तं करोति ।
सैषा मध्यावृत्तिः ।
"यत्रातिरात्रात् पृष्ठ्यमुपयन्ति, प्रथमस्याह्नोऽस्य प्रक्लृप्तानुरूपः" इति
अजाम्यर्थः । Ārṣ. K. IX. 1. D.
"अथ खल्वेन त्रयस्त्रिꣳशे अहनी सन्निपततः ।
केनाजामीत्यह्न एव सामान्यात् ।
अपि वा कण्वरथन्तरमनुकल्पयेत् ।
पूर्वस्याह्न आर्भव उत्तरस्य वां मध्यन्दिने" पृष्ठ्य उत्तरस्य, विषुवत्
स्थानीयो व्रतं पञ्चदशरात्रस्य । Ārṣ. K. V. 132 a.
पृष्ठ्य एवोत्तरस्य, तत्राग्निष्टुतमुपदधाति ।
स्तुत्रप्राये ब्रह्मस्थानेऽवच्छिकीर्षन् ।
तस्य
'अग्निः प्रक्लेन जन्मना' इति SV. 2. 1061; cp. RV. 8. 44. 12.
होतुराज्यमजाम्यर्थम् ।
व्याख्याता अन्यतोऽतिरात्राः ॥ १० ॥
न्यायकृतमासप्तदशरात्रात् ।
सप्तदशरात्रेऽभिप्लवपञ्चाहः सम्पद्यते ।
ते खलु स्वतन्त्रा एव त्रिकद्रुकाः स्युरित्येके ।
यावत् षड्भिरान्नेयुः षडेवैते सतस्तन्त्राण्यापादयेयुरिति ।
आपादयितव्यांस्तन्त्राणि मन्य इति गौतमः ।
अहर्गणप्रत्यवायो ह्येवमभविष्यत् ।
त्र्यहाद् द्व्यहम् ।
एवमिव ब्राह्मणं भवति—"अनन्ता वा एता यत् पञ्चाहविधाः" इति ।
PB. 23. 11. 2.

1 अन्वा० B. 2 ०मप्रविश्याज्यते C; ०मपविश्याज्यते G1, G2, J; ०मविश्याज्यात K. 3 वाचा K. 4 दशमं K. 5 वृत्तस्य त्रातिरात्र B; वृत्रि० G1, G2, J. 6 प्रक्लामनुरूपः C, G1, G2, J. 7 खलु B. 8 वृहती B. 9 आर्भव C. 10 च G1, G2, J, K. 11 ०नेव० G1, G2, J. 12 ०प्तसप्तम० G1, G2. 13 ०वेते C; ०वेव G1, G2; ०वेवते J, K. 14 षट्तान्ने० C, G2, J, K; षट्त्रि० G1. 15 षडेह वसंत० G1, G2, J, K. 16 ०ण्यादाययु० G1; ०ण्यापादाययु० G2, J. 17 ०व्य० C, G1 G2, J, K. 18 मन्यत C, G1, G2, J, K. 19 अनन्धा पञ्चाह एतावद् पञ्चा० B.

अन्ताहर्ह्यंतः षष्ठमुपैतीति[1] ।
स वै पञ्चाहतन्त्र एवाभविष्यन्न षष्ठात् किञ्चित् प्रत्याहरिष्यदिति ।
प्रत्याहरेदिति गौतमः ।
एवमिव ब्राह्मणं भवति—"पञ्चमेऽहनि षष्ठस्याहस्तृतीयसवनं प्रत्याहरति ।" cp. Ārṣ. K. IX. 2 A.
षडहाविलोपाय स त्वेव स्तोमो यः पञ्चमस्य ।
सो[2] वो[3] स[4]स्था रथन्तरबृहत्पृष्ठैः ।
"प्रथमस्याह्न एष प्रज्ञानुरूपः" इत्यज्ञाम्यर्थः । Ārṣ. K. IX. 1.D; 2. A.
व्यावृत्तये पृष्ठ्याभिप्लवयोः श्यैतनौधसब्रह्मसामां पौष्कलश्रुष्यौ-ष्णिहोः अभीवर्तसुज्ञानयोरन्वपाय[5]स्वासु ।
श्यैतनौधसेऽभीवर्तकारिता हि प्रगाथा इति ।
एतेनैवोत्तरे व्याख्याताः ।
षाष्टिकानि पञ्चमस्याह्न उक्थानि ।
तत् कुशलमुद्धरति शून्यं द्विपदा अनन्तेनाचिकीर्षीत् ।
तत्रैतद्दैद्धमघाहं नवमार्द[6]न्तान्वितम्[7] ।
तथदेतां[8]सु
'यं[9]जिष्ठं त्वा ववृमहे' इति । SV. 1. 112; 2. 763; RV. 8. 19. 3.
एता आपद्याः पञ्चममह्न[10]भवन्ती[11]ति ।
"सौश्रवसं मारुतं वेति" विचारयन्ति ।
वैभक्त[12]ं सौश्रवसं पाञ्चमिकं मारुतम् ।
अथ यत्राभिप्लवो रात्रिसत्रेषु कथं कल्पविचारितानीति ।
[अकर्तव्या[13]नीति] शौचिवृ[14]क्षिः ।
नान्यत्र संवत्सरा[15]त्, न संवत्सरसम्मितासु च, नेति ।
कर्त्तव्यानीति गौतमः ।
यावन्ति यावन्त्यभ्यनुवीत[16] विहितान्यप्रतिषिद्धानि ।
अथाप्येवमाप्तितरा संवत्सरस्येति ।

---

1 °पैति K. 2 स B; मा G1, G2, J, K. 3 Wanting in C, G1, G2, J, K. 4 °ष्ठाः C, G1, G2, J, K. 5 पञ्चम° C. 6 °मानाः is suggested. 7 °होऽभि° B; °होऽभी° K. 8 गूर्दं C; गूर्दं G1, G2, J, K. 9 °मादन्तन्वितं B; °मानन्दन्तान्वित G1, G2, J. 10 °देवता° B. 11 °वती° B. 12 Wanting in B. 13 शौचिवृक्षि ··· कर्त्तव्यानीति (line 24) wanting in G1, G2, J. 14 °रानुसं° C. 15 °वीतेति C. 16 तिद्दि° G1, G2 J.

विंशतिरात्रे द्व्यहार्थे सति विश्वजिदभिजितौ करोति ।
कस्य हेतोरिति ।
सम्पूर्णं विराजꣳ सत्रमुपकृतम् ।
तावेतौ वैराजौ चॉपि च सम्पूर्णौ स्तोमैः पृष्ठैरिति ।
तौ यदत्रैव पृष्ठ्यमानौ तौ पृष्ठ्यादनन्तरितौविति ॥ ११ ॥

पूर्वस्मिन्नेकविꣳशेऽतिरात्रे तृतीयोऽभिप्लव आवृत्तो भवतीऽ अनावृत्त इति ।

अनावृत्त इति शौचिवृत्तिः ।
न ह्यावृत्तिर्विज्ञायते ।
अथापि [कथꣳ] सप्ताहो विषुवान् स्यात् ।
आवृत्तं इति गौतमः ।
रोहप्रत्यवरोहौ सत्रमुपकृतो विषुवानिति ।
यद्येतदनादिष्टावृत्तिरिति, नाभिप्लवस्यावृत्तिः, कचनादिश्यतेऽर्थ एवावर्तयतीति ।
यद्येतत् कथꣳ सप्ताहो विषुवान् स्यादिति, दृश्यते, षडहो विषुवत्स्थाने चतुर्दशरात्रे, तथा सप्ताहः सꣳसित्स्यति ।
अथापि यदनावृत्तोऽभविष्यदतिरात्रोऽभिप्लवः, "षडहोऽतिरात्रः, द्वावभिप्लवौ षडहावतिरात्रः" इत्यभविष्यदिति । cp. PB. 23. 15. 1; ĀP. Ś. 23. 3 3.

रूढावृत्ताविति त्वेतौ नानादिशति ।
उक्थ्यान्युत्तरस्मिन् स्वरसाम्नो हुवते ।
पृष्ठ्योपधानात्तत्र तान्येव द्विवचनानि यान्येकविꣳशत्यहꣳकारिणाम् ।
"श्यैतनौधसब्रह्मसामानः स्वरसामानः पौष्कलश्रुध्यौष्णिहाः, विषुवतः सामतृचस्य लोकꣳ आभीशवम् ।" Ārṣ. K. IX. 3. C.

---

1 ०र्णा B. 2 तावि० G1, G2, J; तावितौ K. 3 विराजौ G1, G2. 4 वा पञ्चसूक्तैः स्तो० C; वा पञ्चपूष्णै स्तो० G1, G2, J. 5 Wanting in C. 6 ०न्तरावि० B. 7 ०तिरात्रे C, G1, G2, J, K. 8 तृतीयेऽभि० C, G1, G2, J, K. 9 ०ति B. 10 ना० G1. 11 ०ज्ञा० G1, G2, J. 12 Wanting in B. 13 स्यादिति C, G1, G2, J, K. 14 आवृत्तिरिति B 15 ०वृनो G1, G2; ०कृनंकृनो K. 16 वृत्ति G1, G2. 17 ०न्तीति B. 18 ०येते G1, G2, J. 19 ०हः सत्स्यति B, ०हः सप्त स० G1, G2, J; ०हः सप्तꣳ स० K. 20 ०हो द्विरात्रः C. 21 ०द्वाभि० K. 22 ०ध्यत् B. 23 B adds अति. 24 त्वतो C. 25 ०नुत्तर G1, ०नुत्तर० G2, J, K. 26 स्वर is wanting in G1. 27 साम्नै G1; ०साम्नै G2, J, K. 28 विधनानि C; विवचनानि G1, G2, J, K. 29 ०हका० C, G1, G2, J, K. 30 सामा० G1, G2, J, K. 31 लोका G1, G2, J, K. 32 अभी० B, G1, G2, J.

अभीवर्तापायात्
'आयन्त इव सूर्यम्' इति । SV. 1. 267; 2. 669; RV. 8. 99. 5.
"विकर्णमिन्द्रकतोरपायात्, न्यायक्षत्रमा सꣳसद्भ्यः ।" cp. Ārṣ. K. IX. 3. c, d.

सꣳसत्सु पृष्ठ्यं विपुवत्स्थानीयं करोति ।
अनिरुक्तं च त्रयस्त्रिꣳशम् ।
तं खलूत्तरस्य ऽह्यहस्य स्तोमैरभिविधत्ते वैपुवतीयमत्याधित्सन् ।
"सँ एवं आवृत्तः स्तोमः पूर्वस्ऽयहः ।
अनुपूर्वस्तोम उत्तरः ।
एतं विशाल[ः पृष्ठ्य इत्याचक्षते] ।" Ārṣ. K. V. 136a.
पृष्ठ्यस्तोमं पुरस्ताच्चोपरिष्टाच्च रूढावृत्तमनिरुक्तं सप्तमं मात्रासम्पूरणायैकाहम् ।
तत्रानुष्टुभि बृहत्करोति ।
अजाम्यर्थोऽथापि व्रतस्थानो भवति ।
औपोत्तमादुभयसामव्रतमिति ॥ १२ ॥

न्यायक्षत्रमा त्रयस्त्रिꣳशद्भ्यात् ।
तत्तत् पञ्चाहविहितम् ।
तत् कतमोऽयं पञ्चाह इति ।
पृष्ठ्यस्तोमः पञ्चाहः इति कापर्दयः ।
अनादेशे कमन्यं प्रतीयाम ।
अथापि यत्र यत्र त्रैकद्रुको भवति आदिशत्येवैनं तत्र [तत्र] ।
अथाप्याह—"नानाव्रह्मसामान्युपयन्ति" इति । PB. 24. 1. 14.
एष नानाव्रह्मसामा भवति ।
अथापि दाशरात्रिकैरहोभिः पञ्चाहान् सꣳवर्णयन्तीति [पृष्ठ्यस्तोमपञ्चाहत्वादेव ।
अथाप्याह—"त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति" इति । PB. 23. 3. 9; 24. 3. 4; 25. 3. 5.

---

1 ०सद्यः C. 2 ०श० C, K. 3 वै विपु० C. 4 Wanting in G1, G2, J. 5 एव B. 6 B omits :एतेष ··· ०क्षते. 7 ०ताद्ध्योप० J. 8 ०कस० B; ०के स० G1, G2, J, K. 9 ०मि B. 10 ०र्यं० G1. 11 ०त्रान्तप० C, G1, G2, J. K. 12 यत् G1, G2, J, K. 13 कर्मो० G1, G2, J, K. 14 कापदवः C, G1, G2, J, K. 15 ०यामः B. 16 य B, G1, G2, J. 17 आदितो वैनं B. 18 Wanting in B, G1, G2, J, K. 19 ०हात् C. 20 ०यति B. 21 B omits एतेषस्तोम ··· सꣳवर्णयन्ति (p. 171. 28.).

त्रिवृत्प्रथमं दाशरात्रिकम् ।
तदेवावृत्तस्योदयनीयं भवति ।
अथापि विश्वजिता ज्ञानीमः ।
विश्वजिद् ह्येत पृष्ठ्यांविलोपानन्ववैतीति ।
स वै नूनमभ्यासक्तो[3] ह्यहीनेष्वनभ्यासक्तं तु मन्यामहे ।
न हि विज्ञायतेऽभ्यासङ्ग इति ।
"अभिप्लवपञ्चाह इति गौतमः ।" cp. LS. 10. 4. 6.
आदिष्टः कल्पेन भवति ।
अथापि न पृष्ठ्यपञ्चाहः कृतः ।
अकृतो विश्वजितेन पृष्ठ्यस्तोमपञ्चाहः ।
अभिप्लवपञ्चाहस्तु विद्यते ।
तं कृतवदतिक्रामति ।
अथापि कृत्स्नावेव पृष्ठ्यस्तोमौ नाभिप्रयोगं लभेते ।
कुतो विप्लुतौ लभेयातामिति ।
अथापि शश्वदेकेऽध्वर्यवोऽभिप्लवपञ्चाहमादिशन्ति ।
अथापि कालवचनो व्यूहेनादिशन्ति ।
"अतिरात्रो ज्योतिर्गौरायुः पञ्चाहः ।" PB. 24. 5. 1; cp. AP. Ś. 23. 6. 2; LṠ. 10. 4. 8.
स द्वितीयः स तृतीयो विश्वजिदतिरात्र इति ।
यद्येतदनादेश इति, आदेशजातिरेषा भवति यदधिकारः ।
यद्येतद्यत्र यत्र त्रैकद्रुको भवति आदिशत्येवैनं तंत्र[6] तत्रेति, पृष्ठ्यस्तोम-
पञ्चाहो वाऽथादिश्यते, पृष्ठ्यावलम्ब उत्तरे नवरात्रे छन्दोमवति
दशरात्र इति ।
यद्येतत् "नानाब्रह्मसामान्युपयन्ति" इति, कारणकारितमेतद्भवति । PB. 24. 1. 14.
यद्येतंद्दाशरात्रिकैरहोभिः पञ्चाहान् संवर्णयन्तीति,[12]] सङ्ख्याभिप्रायेण[13] तदाह—
द्वौ पञ्चाहौ दशरात्र इति ।
यद्येतत् "त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति" इति, PB. 23. 3. 9; 24. 3. 4; 25. 3. 5.

---

1 °जिष्युतत्व° G1, G2, J; °वित् प्र° K. 2 °प्लव° J. 3 C adds ऽभ्यासक्तो. 4 नमेते G1, G2, J. 5 °विश° G1, G2. 6 तंत्र for यत्र तत्रेति in G1, G2, J, K. 7 °न्दो भ° J. 8 °साम° B; °सभा° G1. 9 °रिणमत° G1. 10 °दे° K. 11 दाद् C. 12 See p. 170 no. 23. 13 °माव पत° C, G1, G2, J, K.

उत्तम एतत्त्रयस्त्रिरश्चाग्रेऽभिनन्दोब्राह्मणं वदति—"त्रयः पञ्चाहाः पुरस्तात् त्रय उपरिष्टात्" इति। Say. PB. 24. 3. 4. यद्येतद्विश्वजितो जानीम इति, नेह पृष्ठ्यार्थेन विश्वजिदागच्छति, विपुवदर्थेनैव आगच्छतीति।

5 "नाना ब्रह्मसामान्युपयन्ति" इति। PB. 24. 1. 14.

यद्धि पृष्ठ्योरनुव्यत्यय ऐतनौधसे व्यत्यहरिष्यद् भूयान् व्यत्यय आकाङ्क्ष्योऽभविष्यत्।

प्रतिपदामाज्यानामौष्णिहयोरिति ऐतनौधसवर्णनानि।

बार्हद्रथन्तरपृष्ठ्याद्यदु विश्वजितं विपुवन्तमितो यदेति तस्मैतस्मिन्ननुग्रह

10 इति ॥ १३ ॥

---

1 एकस्त्रि० B. 2 ०नन्दाम ना० B. 3 ०जिताना B. 4 ०र्ये G1, G2. 5 ०जिता ग० C. 6 विश्वव० G1; विषु is wanting in J. 7 ०न० B. 8 यदे C, G1, G2, J. 9 ०नुव्यत्यय० G1, G2. 10 व्यतिहरिष्यद् तदा B. 11 ०क्षो० E. 12 ०द्यापेति G1, G2, J.

अथ दशमः प्रपाठकः

'अग्निर्मूर्धा दिवः ककुत्' इति SV. 1. 27; 2. 882; RV. 8. 44. 16.
उक्थप्रणये करोति ।
कस्य हेतोरिति ।
सामन्या मूर्धन्वती वैपुवतीयेऽभिरूपा ।
तत्रैतत् सत्रासाह्नीयमापन्नं च विश्वजितम् ।
अपि च वैपुवतीयम्, विपुवत्युभे षोडशिसामनी करोति वैपुवतीयमन्र्याधित्सन् ।
"उत्तमः पञ्चाह आवृत्तो भवती३ अनावृत्तः" इति तद् व्याख्यातम् ।
Ārṣ. K.V. 138 a.

पूर्वस्मिन्नेकविंशतिरात्रे सत्रेमासं उत्तरम् ।
तत्रैते संमस्य निदधाति ।
एकविंशतिरात्रं च द्वादशाहं च ।
एते नानात्वक्लृप्त इति ।
पञ्चाहक्लृप्तमुत्तमम् ।
प्रथमे विषमयुक्ताः पञ्चाहाः ।
तत्र पञ्चाहानेव करवाणि ।
एवं पक्षयोः समाधिरिति ।
तत्र कथं बृहद्रथन्तर इति ।
यथालोकमेव ।
नहीह तद् ब्राह्मणमिति ।

---

1 In C only. 2 सात्रा B; सामान्या C, G1, G2, J. 3 ऊर्ध्ववती B. 4 वि० G1, G2. 5 ०मानि B; ०मानी G1, G2, J. 6 ०न्वा० is suggested. 7 समसा० G1, G2, J, K. 8 ०सत C. 9 सा० C. 10 एके B. 11 ०मंन्यु० G1, G2; ०मे यु० J. 12 इन्त C, G1, G2, J, K.

कथमु ब्रह्मसामनीति ।
श्यैतनौधस एव ।
नहीह तद् ब्राह्मणमिति ।
यस्य स्यात् स एवायं पञ्चाह इति ।
तथैव तस्य बृहद्रथन्तरे तथा ब्रह्मसामनीति ।
ते चेद्यथालोकबृहद्रथन्तराः प्रथमस्य, प्रथमस्याह्न एष प्रज्ञानुरूप इत्यजाम्यर्थः ।
यद्यु वा अयथालोकबृहद्रथन्तरोः प्रथम एव ।
अथोपरिष्टाद्यद्यु ह यथालोकबृहद्रथन्तरोः उत्तमे, बृहन्निधनं वार्कजम्भमनुकल्पयेत् ।
यद्यु वा अयथालोकबृहद्रथन्तरा उत्तम एव ।
अथ खल्वाह—"यद् विश्वजिति छन्दोमानुपयन्ति" इति । PB. 24. 3. 2.
कस्येदं ब्राह्मणं स्यादिति ।
षाडहिकानां समस्तानामिति ।
चतुरावृतामिति ।
छन्दसामिति ।
"'त्रिवृता प्रयन्ति त्रिवृतोद्यन्ति' इति । PB. 23. 3. 9; 24. 3. 4.
अयः पञ्चाहाः पुरस्तात् अय उपरिष्टात्" 'इति । Sāy. PB. 24. 3. 4.
न्यायक्षसमाविधृतिभ्यो न्यायक्षसमाविधृतिभ्यः ॥ १ ॥

सप्तमः पटलः

अथैता विधृतयो भूतानां विधारिण्यः ।
तत्रैतानहर्गणान् करोति ।
त्र्यहं षडहं दशाहं द्वादशाहमिति ।
तानतिरात्रैर्विधारयति ।
एवं सर्वमेवं विधृतं भविष्यतीति ।
कानि तन्त्राणीति ।
दशरात्रस्तोमविकृत इत्येके ।

---

1 C, G1, G2, J, K add उ. 2 ब्राह्मणसा० G1, G2; ब्राह्मणस० J. 3 ०भा० B, J, K. 4 यदु B. 5 ०र: B. 6 ०मस्य B. 7 ०दु G1, G2. 8 B adds उत्तमः. 9 उत्तरे C, G1, G2, J; K omits उत्तमे ... ०न्तरा (line 11). 10 वाश्व० B. 11 ०र B. 12 Wanting in G1, G2; य J. 13 B adds त्रय. 14 Wanting in G1, G2, J. 15 In B only. 16 महत् G1, G2, J, K. 17 ०त्रिर० G1, G2, J, K. 18 ०भिव B, K. 19 ०मं वि० G2, J, K.

ज्योतिष्टोम इति शौविवृक्षिः ।
अनादेशे कमन्यं प्रतीयाम ।
अथाप्याह—"ज्योतिष्टोमस्याऽयनेन यन्ति" इति । PB. 25. 8. 5.
शतसंवत्सरे ज्योतिष्टोमेनं यन्तीति [3]वैतदवोचदिति ।
कौसुरुबिन्द इति गौतमः ।
एते[4] कल्पेनादिष्टे भवतः ।
इहोतं तदभिरूपतरं यथोच्चाहीने सत्रे ह्येव समासो ऽभिरूपतरः ।
यथोच्चाँहीन इति ।
व्याख्यातानि सन्धिषामानि ।
एवं चेत् सन्धिषाम स्यात् ।
"कौत्सस्य लोक उद्धरशीयम्" । Ars. K. IX. 8. a.
एतेनेडाकामश्च सिध्यत्यजामिकल्पश्चेति ।
तद्यदेतासु
'आ[1] [2]त्वा विशन्त्विन्द[3]वः[1] [2]' इति SV. 1. 197; 2. 1010; RV. 8. 12. 22.
एता रात्रेर्विकृतौ दृष्टा इति, नित्यासु वेति विचारयन्ति ।
अर्थकारितमुद्धरशीयम् ।
स किमर्थो नित्याश्चयावँयेदिति ।
पञ्चदशानां दशमस्य नानदं षोडशिसाम ।
एवं छन्दसामनन्तरं यस्तदु सन्धिषामैव भवति ।
यथौशनकावे समाँचारयिष्यत्—यथा रथन्तरापचित्या रथन्तरꣳ सञ्चरते ।
अथापि कावं तृतीयसवनेन समधिचारयिषीत् ।
तद्वशेनौशनम् ।
तत्रैते वैश्वज्योतिषवासिष्ठेऽपुरस्तात् स्तोमे पदानुस्वारे यँथौशनकावे ।
एकधिरशेष्वर्कान् करोतीत्यँन्तपँर्ययिणो हि, स यन्नँवमँप्रभृतिष्वन्तपर्ययित्वादेव ।
अथाप्येते सप्तमप्रभृतिषु दशरात्रे दृष्टाः, उपपक्षं द्वादशाहे नवमप्रभृतिषु प्रयुज्येरन्निति ।

---

1 ०मः C, K. 2 ०मायनेन C. 3 नै० B. 4 एतेन C. 5 रहो C, रत्यहो G1, G2, J, K. 6 ०चा० C, G1, G2, J, K. 7 ०चा० C, G1, G2, J, K. 8 एतं G1, G2, J; एतं K. 9 रात्रैर्विकृतौ G1; रात्रैर्वि० G2 10 ०वा० G1, G2, J. 11 ०नवाके G1, G2, J. 12 संचा० B. 13 ०रेते G1, G2; ०रे J. 14 ०चि० B. 15 यथौ० C; यथाशनकावे G1, G2, J; यथो० K. 16 C, G1, G2, J, K omit ती. 17 ०र्पयि० for ०पर्ययि० in C. 18 यन्नवसम०···उप is wanting in G1, G2, J. 19 ०मं प्र० K.

कावस्पर्क्षु दीर्घतमसोऽर्कं पतासारं स्थानमापन्नो द्वादशोऽहन्युत्सेधनिपेधौ करोति दशमादन्तान्वितौ।
यमातिरात्रैः, स चादित्यानामष्टावतिरात्रान् करोति, अष्टौ यमा आदित्या इति।
आदित्यानां द्वन्द्वदर्शनादभिप्लवातिरात्राणां द्वन्द्वानि करोति।
अथ खल्वायुष्टोमे चाभिजिति चाजामिकल्पे सौभरं करोति।
तत्खलु हारिवर्णस्यर्क्षु करोति।
पतासारं स्थानमापन्नमिति ॥ २ ॥

अथैता आञ्जनाभ्यञ्जनाः प्रजापतीप्सामुपकृताः।
तत्र सर्वस्तोममुपाहरति।
एषोऽरूक्षस्तोमतः संस्थातः पृष्ठत इति।
तद् यत् पङ्क्तिशस्थानम्, एवमपर्वविलोप इति।
उत्तमाभिप्लवावावृत्तौ भवतः २ अनावृत्ताविति।
अनावृत्ताविति शौचिवृत्तिः।
न ह्यावृत्तिर्विज्ञायते।
अथास्या मध्ये सर्वस्तोमो मध्यस्थानो विषुवानिति।
आवृत्ताविति गौतमः।
प्रतिष्ठाकामस्तत्र एतस्मिन् स्थाने व्रतं करिष्यन् भवति।
नैतदन्यत्र मध्याद्वान्तोद्वा भवतीति।
यद्येतदनादिष्टावृत्तिरिति, नाभिप्लवस्यावृत्तिः, क्व च नादिश्यतेऽर्धं पर्वा-
धर्तयतीति।
यद्येतदमध्ये सर्वस्तोम इति, अपर्वविलोपायैतद् भवति।
पञ्चमश्चामध्ये विषुवन्तं यथा त्रयोदशरात्रे सप्तसप्तेति।
"संवत्सरसम्मितासु प्रायणीये चतुर्विंशं प्रतिपिध्यं त्रिवृदेव कार्यम्"
इत्याह। cp. PB. 24. 14. 2; LŚ. 10. 5. 1.
"निष्पन्नचोदितत्वादेतदपूर्वं प्रायणीयं चेति।
स्तोमविकारमेके।" cp. LŚ. 10. 5. 2.

---

1 °स्तो हि G1, G2. 2 C, G1, G2, J, K add हि. 3 °थासादि° C, G1, G2, J, K. 4 °स्तोने C, G1, G2, J, K. 5 द्धभि° C; धभि° G1, G2, J, K. 6 वा° C, G1. 7 °सर्क् B. 8 अ° B. 9 °म्या° G1, G2. 10 °रहारावेति C. °रहारात्रि G1, G2, J, K. 11 °वक B. 12 वं B, K. 13 °नाभि° C, G1, G2, J, K. 14 G1, G2, J omit वा. 15 °प्दन° C. 16 षं B; ङ्ग C 17 °न्तो C; °न्ता G1, G2, J, K. 18 वा° G1, J, K. 19 G1, G2 omit सर्वस्तोम ... °मध्ये. 20 °प्दत् C, G1, G2. 21 C adds तं. 22 J omits कार्यं ... स्तोम (p. 177. 1).

तस्यैवाधिकारात्चतुर्विंशं त्वेव कार्यमिति निष्ठा ।
तथाहि ब्राह्मणम्—तौ यताः संवत्सरातिमुपक्रताः, तत्र यदेतान्यहान्येव संवत्सरस्य प्रयुक्तमान्यहानि भविष्यन्तीति ।
तृतीयेऽभिप्लव इषोवृधीर्यसमन्ते कुर्याद्न कुर्यादिति ।
न कुर्यादित्याहुः ।
पृष्ठ्यसाम्निपातिके इमे भवतः ।
न चेह पृष्ठ्यो भवतीति ।
कुर्यादित्यपरम् ।
नानापर्वणोरिमे सन्तानार्थे भवतः ।
नानापर्वतरे चैतेऽहर्गणश्चैकोऽहश्च ।
भूयसा चैव सांवत्सरिकाणां द्रव्याणामभिप्रयोगो भवति ।
अथाप्यत्र विश्वजिदभिजित्सांनिपातो भवति ।
एतौ च पृष्ठ्यसदृशाविति ।
"आवृत्तेऽभिप्लवे कतमत् सन्तनि कुर्यादिति ।" cp. LŚ. 10. 5. 4, 6.
"यण्वमित्येके ।" cp. LŚ. 10. 5. 7.
एतदेकार्थं द्रष्टम् ।
अथाप्येतदेषामावृत्तानामन्ते भवति मध्योद्यायमिदं सत्रमिति ।
अपत्यमित्यपरम् ।
एवं पुरस्ताच्छन्दोमानां द्विप्रयुक्तानि भवन्ति ।
सन्तनीत्यपरम् ।
एतदेषामोधं भवति ।
असम्प्राप्तेरन्ततो लोपः ।
शाकरवर्णमित्यपरम् ।
एतदेषामकृतं भवति ।
अथाप्येवं [सम्प्राप्येयं] भूयः सांवत्सरिकं द्रव्यमनुगृह्णत इति ॥ ३ ॥
प्रजापतिकामसत्रमुत्तरम् ।
तत्र नवाह्नान् करोति, न्यूनान् प्रजापतिरिति ।
षडभिप्लवस्य सत्रस्येदं स्थानम् ।

---

1 ॰मिहनिष्पद्यति G1, G2. 2 एता G1, G2, J. 3 ॰वान्य॰ G1, G2, J. K. 4 प्रयु॰ J. 5 ॰न्यम॰ G1, G2. 6 ॰भ्येते स॰ C, K; ॰द्धिते स॰ G1, G2, J. 7 B adds तस्यात्र. 8 ॰र्यो J. 9 ॰र्णोरेवैते॰ C. 10 ॰भेदाद॰ K. 11 ॰विप्र॰ C, G1, G2, J, K. 12 ॰जिदस्त॰ G1, G2, J; ॰जिषत्त॰ K. 13 ॰द॰ B, G1, G2, J. 14 ॰मय G1, G2, J. 15 Wanting in B. ॰यः G1, G2. ॰य J 16 ॰द् C.

स चाभिप्लवतामनतिचिक्रमिषन्नेतानेव षडहान् संन्यूह्य चतुरो नवाहान् करोति।

अथ खल्वत्र भागैस्तोमान् करोति, पंतेऽयने इष्टा इति।

तेषां यदेवरविधः सꣳस्थायोगः, एवमुभे रूपे षडहरूपं च [कैंकुप्रूपं च]।

अथाप्येवं तावत्यः सꣳस्था यथा पण्णामभिप्लवानामिति।

"उद्धरत्यर्के यो विधृतिषु" दशरात्रे ह्यर्कान् करिष्यन् भवति। Ārṣ. K. IX. 10. d.

"राथन्तरेणाह्ना त्रिवृतः प्रतिपद्यंते।

बार्हतेन पञ्चदशान्, राथन्तरेण सप्तदशान्, बार्हतेनैकविꣳशान्" अन्यषे-तानँ् नवाहान्। Ārṣ. K. IX. 10. d.

तत्र व्यत्यासः, कुशलेनोपपद्यत इति।

प्रतिष्ठाकामसत्रमुत्तरम्।

तदाञ्जनाभ्यञ्जनाभिर्व्याख्यातम्।

न्यायक्षुसमेकैंषष्टिरात्रात्।

"अथैकैंषष्टिरात्रꣳ संवत्सरसम्मितास्थानमेव।" Āp. Ś. 23. 8. 8.

तत्र नवाहैमभितः पृष्ठ्यौ करोति।

एवꣳ सैंर्वꣳ सांवत्सरिकं द्रव्यमनुगृह्यत इति ॥ ४ ॥

अथ केनासꣳस्तीर्णान्यभिविद्धीतेति।

रौंत्रसत्रन्यायेनेत्याहुः।

यथा शतरात्रमिति।

अपि वा दशरात्रम्।

व्रतं चैान्ते निधायैं सांवत्सरिकाणामह्नाꣳ समविभागैः सिध्येत्।

तथा कल्पं कुर्वीत।

"यथा संवत्सरसम्मितासु।" LṠ. 10. 5. 1.

अपि वा यत्र भागस्तोमानाꣳ समविभागः सिध्येत्, तैंथा कल्पं कुर्वीत, यथा सवितुः कक्कुप्सु।

ज्योतिष्टोमेन वैपैंः, ऊनस्य पूरयितेति।

---

1 चतुर्भि० C, G1, G2, J, K. 2 संन्यु० C, K; स० G1, G2, J. 3 भागाः स्तो० K. 4 एते या न C, G1, G2, J, K. 5 B omits कक्कु० च. 6 ०न्ते B, G1, J. 7 ०पेतान् B. 8 नवाह्नः G1, G2, J, K. 9 ०नानिम्या० B. 10 ०ꣳमे० B; ०ꣳसमे० G1, G2, J. 11 अथैतदेक० C, G1, G2, J, K. 12 नम्य० G1, G2, J; नम्यम० K. 13 सर्वां B. 14 ०मुपगृ० J. 15 रात्रि० G1, G2; रात्र ... चान्ते wanting in K. 16 चते G1, G2; चाते J. 17 ०यत्र G1, G2; ०य एत्र J, K. 18 समवधाः B, C, J, K. 19 तस्य C. 20 वैमान० B.

अथ प्रायणीयोदयनीययोरतिरात्रयोरादिशति ।
एकत्र षोडशिनं नैकत्र ।
तत्र कथं स्यात् षोडशीति ।
यथा विराद् सम्पदं सम्पत्स्यमानां मन्येत, तथा कल्पं कुर्वीत यथा संवत्सरसम्मितासु ।
अपि वा यत्र भागस्तोमानां संविभागः सिध्येत् ।
[द्वादशाहस्य च गवामयनस्य] सं विराट्सम्पदं षोडश्युपकृतः ।
अथानुपपद्यमानायां प्रकृतौ निर्णीय यथा मन्येत तथा संशयेषु प्रतिपादयेत् ।
तेषां यानि रात्रिसत्रन्यायेन वर्तन्ते पोडशिमन्तौ तत्र, यथा द्वादशाहे ।
अथ यत्र रोहमत्यवरोहौ सत्रमुपकृतमपोडशिकौ तत्र, यथा गवामयने ।
यत्रानुमध्यं षोडशी दृश्येतापोडशिकौ तत्र ।
यत्रो न दृश्येत षोडशिमन्तौ तत्र सत्रकामस्य ।
अथापि वा चतुष्टोमेष्वपोडशिकौ सर्वस्तोमेषु षोडशिमन्ताविति [षोडशिमन्ताविति] ॥ ५ ॥

अष्टमः पटलः

अथातः सांवत्सरिकाणि ।
तेषां यद् गवामयनेन सामेति व्याख्यातम् ।
तदेतदपवदति व्यावृत्त्यर्थं वा तत् ।
अपि वा ब्राह्मणेनैव कारणं वदति ।
तत्रादित्यानामयनमुद्भिदलभिदौ मात्रासम्पूरणाय करोति ।
तत्रैक इन्द्रक्रतावुत्सेधनिपेधौ कुर्वन्ति ।
एष औत्तरपक्षिक इति ।

---

1 अथा G1, G2, J. 2 °णीयदो° G1, G2, J. 3 चै° G1, G2; से° J. 4 तत् C; wanting in G1, G2, J. 5 G1, G2 omit सम्पदं. 6 °नान् B; °नाना G1, G2, °ना J. 7 °योत C. 8 C, G1, G2, J, K omit यथा ... सिध्येत्. 9 B omits द्वादशाहस्य ... °नस्य. 10 Wanting in C, G1, G2, J, K. 11 प्रा° G1, G2. 12 °तो J. 13 येषां° G1, G2, J. 14 वा B. 15 °त्ते B. 16 B adds च. 17 सत्रिरपकृतापोडशिनस्त° B. 18 षोडशी दृश्येता is wanting in C, J. 19 °तः षो° G1; °तां षो° G2, K. 20 यत्र C. 21 यथा B. 22 तत्र कात्स्न्यांय C; सत्रकात्स्न्यांय G1, G2, J. 23 अपि C, G1, G2, J. 24 Wanting in B. 25 In B only. 26 तपप° G1, G2, J. 27 व्यावृत्त्यर्थं ... वदति । त is wanting in G1; वाहृष्य° G2, J. 28 °र्थं C. 29 Wanting in C, G2, J, K. 30 °न्न उ° C, G1, G2, J, K. 31 °नाउ° B. 32 °प° B, G1, G2, J, K.

तत्र निन्दा यत् पद् प्रगाथा भवन्ति, अष्टौ प्रागाधिकानीति ।
यथासमाम्नायं त्वेवैवं पक्षयोः समाधिरिति ।
पञ्चदशभिर्वृद्धयामुपहिते गोआयुषी, ते पञ्चदशभिर्वृद्धिभ्यां प्राचिकमेयिषीत् ।

5 छन्दोमस्तोमं दशरात्रे करोति, पाङ्क्तश्छन्दोमा इति ।
तस्यान्ते चतुर्विंशे सन्निपतति ।
तत्र पञ्चविंशं करोति ।
नानात्वार्थः स उ चतुर्विंश एव भवति ।
चतुर्विंशो ह्येवैष एकाह्नि प्रस्तुत इत्यालोभाद् बृहद्रथन्तरे पृष्ठे ।
10 अथापि स्तोमक्षात्रेण ।
अथाप्येवं तावन्तः पृष्ठोपाया यथा गवामयने ।
समूहति बार्हद्रथन्तरपृष्ठयात्, उद्धरति षोडशिनं चतुर्थात् ।
विराजमन्वपायि स्वराजोपेयुः ।
स्तोमस्य वा लोभात् ।
15 अथापि यद्यु हैनमेकविंशमकरिष्यदुपैष्यच्छन्दोमात् ।
यदि छन्दोममेकविंशयात् ।
न चैष सैकविंशे क्रतावनेकविंशस्तथेह भवतीति ।
अथाप्येवं तावन्तः षोडश्युपाया यथा गवामयने ।
अथाप्येवं पञ्चदशसम्पेद् दशरात्रस्य सिध्यति ।
20 पदस्तोत्रीयाः पञ्चदशमतिरिच्यन्ते ।
त्रीण्यत्र सन्तनीन्येकप्रस्तावानि तेभ्यः पद् प्रस्तावा लुप्यन्ते ।
एवमेषा पञ्चदशसम्पत् सिध्यतीति ॥ ६ ॥

दशमस्य चतुस्त्रिंशम् [पंकेऽग्निष्टोमसाम कुर्वते छन्दोमतोयै ।
चतुर्विंशमेके ।
25 एकाहस्तोमो भवतीति ।
त्रयस्त्रिंशं त्वेव स्यात् ।
क्रियमाणे ह्येवैतस्मिन् पुरा छन्दोमस्तोमम् ।]

---

1 G1, G2 omit तत्र. 2 °यद् B. 3 °मेषोद् C; °मिधिषी G1, G2, J, K. 4 पञ्चका उ° C, G1, G2, J, K. 5 °पा° B, G1, G2, J, K. 6 °स्वर्थः G1, G2, J, K. 7 °वैकाहिक C; °एकाहि G1, G2, J; °एकाहे K. 8 °यद्यौ C. 9 °त्रा° C, J, K. 10 अन्यथा° C, G1, G2, J, K. 11 विंश° ... °नेक (line 17) is wanting in G1, G2, J. 12 °रमधिष्यच्छन्दोम्यात् C; °रपधिष्यच्छन्दोग्यात् K. 13 °वैकनेक° C. 14 °वत् यद् B. 15 °क्षत्र° C. 16 °मि° G1, G2, J. 17 °वैकाह्नि° ... °स्तोमम् (line 27) is wanting in B. 18 °त्रये C, J.

एतद्दह भवतीति, यथा भूयस्येत ।
अथाप्याह—चत्वारश्छन्दोमा इति ।
एष एव संशय एकस्तोमेषु[1] ।
सर्व एव द्वादशाहो विकृतः स्यादित्येके ।
द्वादशाहे च श्रूयमाणे किमर्थोऽवयवं प्रतीयादिति ।
कृतप्रमाणाः संशयाँ भवन्तीत्यपरम् ।
ते पश्यामोऽन्यावतिरात्रौ कृत्वाह—अभिजिद् द्वादशाहो विश्वजिद् द्वादशाह इति ।
अथापि नानापदि रात्रेः ससंन्धिकायाः स्तोमविकारो विद्यते ।
सा कथं संशयेषु प्रतीयेत ।
अथापि महत्सु स्तोमेषु सन्धिस्तोत्रीयान् प्रत्यकल्पयिष्यत् ।
एतेन सर्व एकस्तोमा व्याख्याताः ।
अप्यहीनेषु, अथ षोडश्येकविंशस्तोमो वा स्यात् ।
अपि वा ये प्राक् त्रिणवत्रयस्त्रिंशाभ्यामहस्तोमास्तेष्वन्वियादेकविंशमुत्तमेष्विति ।
"तौ खलिवमौ द्वौ" दशरात्रौ भवतः ।
उभयेत्राह दशमधर्मा मानसे तु विचाल्यन्ति ।" cp. Ārṣ K. V. 129 b.
पूर्वस्मिन्नित्येके[3] ।
षष्ठोऽयुक्स्तोमो विकृतो नानापृष्ठो धर्मीति ।
उत्तरस्मिन्नित्यपरम् ।
एष स्थानस्थः ।
अथापीदं यदनातमेतदन्तेऽभिरूपम् ।
अथाप्येवं व्रतस्य मानस्य चाव्यवायो भवति ।
अथाप्येवं त्रिवृत् पञ्चदशसप्तद् दशरात्रयोः सिध्यति ।
अथापि[16] यत्पूर्वस्मिन्नकरिष्यद् बहुना क्रतुंतो मानसमध्यशायविष्यत् ।
अथापि [यत्[17]] पूर्वस्माद् दशरात्राद् बह्वपैति तस्यैतस्मिन्ननुग्रहः इति ।
'अग्न आयूंषि पवसे' इति SV. 2. 814, 868; RV. 9. 66. 19.

---

1 B omits इति. 2 प्रय० B. 3 C, G1, G2, J, K add द्वादशाहेषु. 4 °यो G1, G2, J, K. 5 °ती० G1, G2, J, K 6 सन्धि० B. 7 अभैते० C, G1, G2, J, K. 8 °मस्ते० B. 9 °त्तरे० C, G1, G2, J, K. 10 दा C, G1, G2, J. 11 G1 omits भवतः ··· दशरात्रौ (p. 182. 14.). 12 °भवाद G2, °भवद्वाद J, K 13 °त्येष K. 14 °ष्ठे C, G2, J, K. 15 चावच्यवायौविष्यद् । G2, J, K 16 B adds यद्. 17 क्रतेन C, G2, J, K. 18 Wanting in B, G2, J, K. 19 °द्व० C, K. 20 °मद K.

उत्तरस्य दशरात्रस्य करोति ।
कस्य हेतोरिति ।
शुंशुत्सत्रमिदं भवति ।
सैषाग्नेयी पवितामिव्याहारं शुंद्ध्यर्थेऽभिरूपा ।
अथाप्याग्नेय्यं आंङ्गिरसः, सैषाङ्गिरसी वेर्चंतेति ॥ ७ ॥

प्रतिष्ठाकामसत्रमुत्तरम् ।
तत्र षाडहिकान्मासभाजो रूढावृत्ताग्निदधाति ।
एवं सिद्धौ रोहप्रत्यवरोहाविति व्याख्यातम् ।
व्रतं विष्णुवांस्तत्रोक्तमयनेषु ।
अपि चं पृष्ठ्यस्तोमो" विहृतैः स्यादिति ।
अथाप्युंदाहरन्ति ।
यज्ञसमास उत्तरम् ।
तत्रैतानि घुक्तानि स्थानानि ।
अतिरात्रः शौनासीर्यो मासो दशरात्रो महांव्रतमिति ।
कर्तव्यानीत्येके ।
कं पर्व सत्रन्याय इति ।
अकर्तव्यानीत्यपरम् ।
एवं पुराणं वेदयन्ते ।
अथाप्यनादिष्टः प्रायणीयो व्यूढेन भवति ।
"तत्र यत् पुरस्तादतिरात्रमकरिष्यँदलप्धो रोहोऽभविष्यत् ।
अपि च सुत्यां हविर्यज्ञा व्यर्धयिष्यन्निति ।" cp. LŚ. 10. 11. 4; Katy. 24. 4. 39.
"यज्ञसमासत्वाद्धोत्रा समासः ।" cp. LŚ. 10. 12. 14.
हविर्यज्ञमेकमत्यांत् "अत्सरुकैश्चमसैर्भक्षयन्ति ।" cp. LŚ. 10. 12. 13; Katy. 24. 4. 40; PB. 25. 4. 4; Âp. Ś. 23. 10. 11.
अथ खल्वत्र द्वौ गृहपती सन्निपंतंतः ।

---

1 ॰त्रे C, G2, J, K. 2 शिशुत्सत्र॰ C; शिशुत्सत्र॰ G2, J, K. 3 पठिता॰ C. 4 ॰राय B. 5 ॰द्यभि॰ G2, J, K. 6 ॰य B, G2, J; ॰या K. 7 अ॰ G2, J, K. 8 दै॰ G2, J, K. 9 Wanting in C. 10 ॰भौ B; ॰भौ K. 11 ॰त B, G2, K; ॰तं J. 12 अभ्यु॰ B, अप्यु॰ G2, J. 13 घुरितानि C, G2; घूरितानि J. 14 G1 resumes from here (see p. 181 no. 11). 15 C, G1, G2, J, K omit क. 16 घव G1, G2, J, K. 17 ॰घ्यं घुसो C, G1, G2, J, K. 18 घदैघ्य॰ B. 19 ॰प॰ C. 20 ॰मताव् G1, G2, J, K. 21 ॰पातत: C, G1, G2, J, K.

होत्राध्वर्यवेनैकेन सुवृक्तये इवै, स एष वृत्र्यर्थ एव द्वितीयः ।
स यद् गृहपतिरेतद्गणस्यानमिति ।
स्वर्गकामसत्रमुत्तरम् ।
तत्र संवत्सरेभिप्रयोगो भवति ।
एवं यज्ञर्तपसोरभिवृद्धिरिति ।
तत्रोक्तमयनेह् तेषां यान्येकाह्नैर्वर्तन्ते गौरीवितानि तानि ।
यानि नानाहोभिः सगौरीवितानि तानि ।
नानाह्नां हि सन्तानार्थं गौरीवितमिति ।
"अथ पुरुषस्य नारायणस्यायने विश्वजिदेवोभयोः पक्षसोः स्यादित्येके ।"
cp. LŚ. 10. 13. 4; Katy. 24. 7. 33.
एवं पक्षसोः समाधिरिति ।
यथासमाम्नायं त्वेवमविलोप इति ।
अथैतेषु दशसु विचारयन्ति ।
कानीमान्यहानि स्युरिति ।
ज्योतिष्टोम इत्येके ।
एषोऽधिकृतः पुरस्ताद् भवति ।
अनापन्नान्येतानि पृष्ठ्यानि ।
ज्योतिष्टोमे इत्यपरम्, पृष्ठं गृह्यमाणम् [अंहः] गृह्णीयादिति ॥ ८ ॥
"अथैतत् क्षुल्लकतापश्चितमित्याचक्षते ।" cp. Katy. 24. 5. 8.
"चत्वारो दैक्षा मासाश्चत्वारः औपसदाश्चत्वारः सौत्याः ।" cp. Katy. 24. 5. 1.
तस्य कल्पाः ।
गवामेवायनस्य प्रथमोत्तमौ पूर्वस्य पक्षसो मासौ स्यातां तथोत्तरस्य ।
अथैतं महातापश्चितमित्याचक्षते ।
चत्वारो दैक्षा मासाश्चत्वारः सौत्याः ।
तस्य कल्पः ।

1 ०ध्वर्याव० J, ०ध्वर्यवो० K. 2 सुवर्त्तये C, G1, G2, J, K. 3 नु B. 4 ०दिमायेणागे G1, G2, ०रादिमायाणागो J. 5 ०पतसो० G1, G2, J, K. 6 का० K. 7 Wanting in J. 8 Wanting in C; G1, G2 repeat it. 9 ०ह्ना C, G1, G2, J, K. 10 देवैवं लोप B; त्वेवैवमविलोप C, G1, G2, J. 11 एषोऽवि० C; एष वि० ख, G1, G2, J, K. 12 ज्यौ० C. 13 ०मन् C, G1, G2, J, K. 14 Wanting in B. 15 ०रो G1, G2, J. 16 सौम्याः B, K. 17 गवामयन० C; गवायन० G1, G2, J. 18 ०सोमा० C. 19 तथान्तस्य C; तथातस्य G1, G2, J. 20 ०न् C, G1, G2, J, K. 21 ०त इ० G1, G2, J, K. 22 ०श्चाः संवत्सराश्चत्वार औपसदाश्च० C, G1, G2, J, K. 23 सौस्याः G1, G2. सौस्याः J.

गवामेवायनं चतुरुपेयुः ।
अपि वैतस्यैव पक्षस्यभिवृद्धे स्याताम् ।
त्रयोविंशतिरत्यनमासोः पूर्वे पक्षसि स्युः ।
त्रयोविंशतिरुत्तरे ।
अपि वैतान्येव प्रथमानि चत्वारि समस्येत् ।
यथा त्रीणीतिं संवत्सर इति ।
अपिं वा ज्योतिष्टोमायनमेव कुर्वीरन् ।
एतेषां यन्मन्येरन् तत् ।
अपि वा यथा गणसंवत्सराणां तथो कल्पं कुर्वीत ।
"अथैतत् शार्क्करानाꣳ षट्त्रिंशत् संवत्सरम् ।" PB. 25. 7. 1; cp. Ap. Ś. 23. 11. 11; AŚ. II. 6. 5. 16; Katy. 24. 5. 20; ŚŚ. 13. 28. 6.

तरंसपुरोडाशमन्नसंरोधात् ।
यद्वः पुरुषस्तदघाँ स्याद् देवतेति ।
ते यन्मांसमया वा ईयामाकमया वोमे आपन्ने, हविष्टुमिति ।
अथैतानि महासत्राणि देवानामेव, दीर्घायुषो देवा इति ।
मनुष्याणामपि सिद्धानिं स्युरित्यपरम् ।
बह्वः संनिविश्य सुनुयुः पुत्राः पौत्राः प्रैंपौत्रा इति ।
तानि खल्वनैंतिरात्राण्यविपुवत्कान्यूर्ध्वायमानीमानि भवन्ति ।
तैंत्र यदतिरात्रं वा विपुवन्तं [वों] करिष्यंल्लुंप्तो रोद्धोऽभविष्यत् ।
अथापि न कल्पेनादेशो विज्ञायते नो" ब्राह्मणेन ।
अथाप्येवं पुराणं वेदयन्ते ।
अथाप्याह—"एकविꣳशोऽन्ततः स्तोमानां भवति" इति। PB. 25. 8. 6.
शतसंवत्सरेऽनतिरात्रस्यैव सत इति ।
"अथैतदग्नेः सहस्रसाव्यं परमां विराजमुपकृतम् ।" cp. LŚ. 10. 14. 11; ŚŚ. 13. 27. 7.
सँहस्रसंवत्सरेप्सामुपकृतं वा सहस्रसंवत्सरेप्सामेवोपकृतं स्यात् ।

---

1 ०सां B. 2 स्व wanting in G1, G2. 3 ०णि C, G1, G2, J; ०णिनि K. 4 Wanting in G1, G2. 5 तमेषां G1, G2, J, K. 6 वाका० B. 7 वस्यु० B. 8 ०त्रदास्य दे० C; ०त्राद्स्व दे० G1, G2, J; ०त्रन्तास्य दे० K. 9 स्या० C, G1, G2, J, K. 10 ०त्रानां B. 11 Wanting in G1, G2, J. 12 ०त्रति० C, G1, G2, J, K. 13 अत्र K. 14 Wanting in B. 15 ०पंस्तु० C, K; ०प्रस्त० G1, G2; ०प्यस्त० J. 16 मोहो० B. 17 नु C; न G1, G2, J, K. 18 C, G1, G2, J, K add अपि वा.

तंत्रोक्तमयनेषु तंत्रोक्तमयनेषु ॥ ९ ॥

नवमः पटलः

स्वर्गकामंसत्रमुत्तरम् ।
तद्यत् सारस्वतमेषा स्वर्गोका भवतीति ।
अथैषाऽग्नये कामायेष्टिः पृष्ठशमनार्थैनैव भवति ।
अथ खल्वाह—"तस्यामश्वां च पुरुषीं च धेनुके दद्युः" इति । cp. LŚ. 10. 17. 16; PB. 25 10 22; AŚ. II. 6. 6 30; Katy. 24. 6. 8; ŚŚ. 13. 29. 21; Ap. Ś. 23. 13. 6.

केभ्यो दद्युरिति ।
प्रसर्पकेभ्य इत्येके ।
दृश्यते च प्रसर्पकेभ्यो दानम् ।
अथापि ब्राह्मस्तोमेष्वनृत्विग्भ्यो ददातीति ।
पृथगेवैतैरसा इत्यपरम् ।
कर्तृभिः संयुक्ताः क्रतुदक्षिणा भवन्ति ।
तत्रोपरिवर्तमाने किमर्थोऽयवं प्रतीयादिति ।
अरुणायां कृत्यामुदवसानीयाभिरिष्टिभिर्यजेरन्निति" गौतमः ।
एवं ह्येव यदति सरस्यैकमं भवति ।
अथाप्येषा लोकोक्ता भवतीति ।
सारस्वत एवोत्तरे कुशलं यत् सैन्धनस्तुत्ये ।
"त्रिवृत्पञ्चदशमिन्द्राग्न्योरयनम् ।
एताविन्द्राग्न्योर्भकौ इति यद् गोआयुषी [इन्द्रकुक्षी] सप्राये च ।"
PB. 25. 11. 1, 4. Ap. Ś. 23. 13. 7.

अपि चैन्द्राग्निभ्यामित्याधिस्त्रिवृत् पञ्चदशयोरिति ।
त्रिकद्रुकस्रुसमुत्तमस्य ।

1 तच्चोक्त० C. 2 Wanting in C, G1, G2, J, K. 3 In B only. 4 ०मः स० C, G1, G2, J, K. 5 ०क्षा० B. 6 ०नार्थे० B. 7 ०त्वं B. 8 पुरुषं B, पुरुषी C. 9 दक्षा C, G1, G2, J, K. 10 ०न्ते B. 11 Wanting in G1, G2. 12 ०वैतरेतरस्मा C, G1, G2, J, K. 13 तत्रातपनिवर्त्य० C, G1, G2, J, K. 14 ०याय इच्यनु० B; अरुणानां K. 15 ०त्वे० G1, G2, J. 16 एवमुदक्स० C, G1, G2, J, K. 17 ०स्थं कर्म C, G1, G2, J, K. 18 B adds ते. 19 सन्ननिमंन्वेति B. 20 ०न्द्रन्या० G1, G2, ०न्द्राग्न्या० J. 21 ०नान् G1, G2, J, K. 22 ०ग्न्यार्भ० G1, G2, J. 23 ०कीरिति B. 24 यद्व B. 25 ०व: B. 26 Wanting in B. 27 चैतानभ्याम० C; चैनान्यान० G1; चैनाभ्यान० G2, J, K. 28 ०नि० B.

पते यंदि न ढष्टो इति ।
"यद्वु विश्वजिदभिजितावित्रकुक्षी" समाये[1] च। ŚŚ. 13. 29. 25; Ap. Ś. 23. 13. 9.
अपि चोर्णवे द्वाभ्यामत्याधिक्यिकदुकाणामिति ॥ १० ॥

अथैतंद्दार्षद्व्रतꣳ स्वर्गकामायनम् ।
तस्यैते पुरश्चरणे गौपाल्यं चाग्नीन्धनं च ।
दीक्षाभ्यः प्रैथममिति गौपाल्यमुपसद्भ्योऽग्नीन्धनम् ।
स यर्दृत्विजो वाचार्यस्य वैतौ स्थानिनौ गुरू तयोः प्रैषचरणमभिरूपम् ।
"तदेवं मनुष्येभ्यस्तिरोभवति[2]।" इति । PB. 25. 13. 4; LŚ. 10. 19. 11; Ap. Ś. 23. 13. 15.
"तत प्वारण्यमाविशेत् [मे] पुनर्म्मिमामजेदिति ।" cp. LŚ. 10. 19. 12.

"स्वर्गं लोकमाक्रमते" इत्येके । LŚ. 10. 19. 13.
"व्यावर्तते ।
धेयान् भवतीति वा ।" LŚ. 10. 19. 14.
"अथैतंत्तौरमिष्ट्यैयनं चिरात्कामायनम् ।" cp. PB. 25. 14. 5; Ap. Ś. 23. 14. 1; LŚ. 10. 20. 1; Katy. 24. 7. 1.
अपि वा संवत्सरसुत्यां नेदीयस्या मात्रयेप्सीत् ।
किमर्थ उ तदिति ।
ज्यायꣳ स्यादिति ।
अननुभूतिजं स्यादिति ।
सिद्धिर्दर्शी वा स्यात् ।
सिध्यति वै खलु संवत्सरसुत्याया इष्ट्ययनेनाग्निः ।
तत्रापि सुत्या देवता भवन्ति ।
यावदेवमर्थरूपं च ।

---

1 ऽयने C, K; यदे G1, G2, J. 2 ०ष्ट C. 3 ०प्रायौ B. 4 Wanting in C, G1, G2, J, K. 5 ताभ्या० C, G1, G2, J, K. 6 ०तदार्षदव्रतꣳ B 7 प्रति C, G1, G2, J, K. 8 यदर्त्वि० G1, G2, J. 9 वाचाभ्यस्य B; तावयस्य G1, G2; तावार्यस्य J, K. 10 ०वं B. 11 ०न्ति B. 12 Wanting in B 13 ०मं मा० B. 14 अभ्यावर्तते B. 15 ०वति B. 16 ०ततो० G1, G2. 17 ०रनिष्यायनं B. 18 स्वर्गकामाय तमेवाभिरूपं C; स्वर्गकामाय तमेव G1, G2, J, K. 19 तदेव for अपि वा in C. 20 सा० B. 21 सामुन्वꣳ C; ग्यावꣳ G1; ग्यावन्नꣳ G2, J, K. 22 सिद्ध० B. 23 दृष्ट्य० G1, G2, J, K. 24 यारꣳ दे० B. 25 ०र्यां० G1, G2, J, K.

"अदीक्षितः कृष्णाजिनं प्रतिमुञ्चते ।" PB. 25. 14. 2; cp. LŚ. 10. 20. 2; Katy. 24. 7. 3; ĀP. Ś. 23. 14. 2.

नवनीतेनाङ्गान्यभ्यङ्क्ते, दीक्षारूपमेतद्भवति ।

व्याख्याता इष्टयः ।

इष्ट्यन्तं वा पश्वन्तं सोमान्तं वा कुर्वीतेति ।

उभयोः पृष्ठशमनरूपमेतद् भवति ॥ ११ ॥

"सर्पसत्रे किमयनꣳ स्यादिति ।

गवामयनम् ।

स्तोमविकल्पमित्येके ।" cp. ĀŚ. II. 6. 5. 7; Katy. 24. 4. 48, 49; ĀP. Ś. 23. 14. 10.

अनादिष्टान्यहानि व्यूढेन भवन्ति ।

संवत्सर आदिश्यते ।

तत्र किमर्थोऽवयवं प्रतीयादिति ।

अथापि विषुवदादेशेन रौहप्रत्यवरोहौ, गवामयनोत्पादावेतौ भवतः ।

अथाप्याह—"षण्डकुषण्डावभिगरापगरौ" इति । PB. 25. 15. 3; LŚ. 10. 20. 10.

व्रतेऽभिगरापगरौ भवतः ।

कौसुरुबिन्दे प्रत्यवरोह इति गौतमः ।

एते कल्पेऽनादिष्टे भवतः ।

यद्येतदनादेश इति, आदिष्टे कल्पे न भवतः ।

यद्येतद् विषुवदादेशेन रोहप्रत्यवरोहाविति, इष्यते विषुवानेतयोस्तत्रयोः ।

अर्हति वातवतोरयने तथा रोहप्रत्यवरोहाविति ।

यद्येतत् "षण्डकुषण्डावभिगरापगरौ" इति, अन्यत्र सतोरवेदिष्यत् । ibid.

अपि चैहोपासकयोः ।

अपि वा वचनादभिगरापगरौ स्याताम् ।

---

1 दीष्टं तं त G1, G2; दीष्टयन्त J; दीष्टयन्तं K. 2 ०कृत इत्ये० B, C. 3 B omits मयनोत्. 4 प० B. 5 ०वा० C. 6 Wanting in C, G1, G2, J, K. 7 अयने तदा० B. 8 Wanting in Cख, G1, G2, J, K. 9 यद्येत is wanting in G1, G2, J, K. 10 ०ता० C. 11 ०प्रव० G1, G2, J. 12 द्रवति वा भवतो० B; दवि वानवतो० G1; दवि वातवतो० G2, J. 13 ०तोवरदि० G1, G2, J. 14 वेहो० C, वेहो० G1, G2, J, K. 15 Wanting in G1, G2, J, K.

तत्खलु रूढमत्यवरूढं ततो विपुवानिति ।
व्याख्यातानि सर्पसामानि ।
विपुवति सर्पसामानि कल्पप्रायाणि ।
तेषां यदेवमानुपूर्व्यं निधनान्येषामादित्यस्यैषामुपकृतानि तेषामेवानुपूर्व्यम् ।
यथान्येषामेतद्गणनिधनम् ।
तत् त्रिणिधनानुग्रहाय माध्यन्दिनेऽचिकीर्षीत् ।
आनुपूर्व्यमितरे ॥ १२ ॥

अथैते गौपूत्रश्वसूक्ते भाजाभाजयोः स्थाने सप्राये च ।
अपि वैनयोर्ज्योतिः समृद्धि [निधने] यथा भाजाभाजयोरिति ।
दक्षिनर स्तोमं करोति, दरद्रुकाः सर्पा इति ।
द्वादशं विपुवन्तमित्याधित्सन् ।
अथापि शश्वद् द्वादशौ विषसेचनौ नाम सर्पाणां दन्तौ भवतः ।
तद्रूपं विपुवत्यचिकीर्षीत् ।
प्रजापतिकामसत्रमुत्तरम् ।
तत्र संवत्सराभिप्रयोगा भवन्ति ।
संवत्सरर हि प्रजाः "पशवोऽनुप्रजायन्ते" इति हि भवतीति । PB. 19. 5. 5.
तत्रैतान्येव त्रीणि समस्य निदधाति ।
एवमातृतीयं पृष्ठ्याभिप्लवयोर्दशरात्रस्येति विकार उपपत्स्यत इति ।
"'तत्रैके" गवामयनमन्ततः कुर्वन्ति प्रजापतिकामसत्रत्वात् ।
एतेन वै गावः प्रजातिं भूमानमगच्छन् प्रजायन्ते बहवो भवन्तीति' ।'
cp. PB. 15. 3. 21; Ap. Ś. 23. 14. 11.
स्तोमतश्चैव गवामयनानाꣳ रोहो भविष्यतीति ।" Sāy. PB. 25. 16. 3.
अथैतत् "प्रजापतेः सहस्रसंवत्सरं परमां विराजमुपकृतम् ।" Ap. Ś. 23. 14. 12.

---

1 °नकुभो वि° B. 2 आस्वा° B. 3 Wanting in G1, G2, J, K. 4 कल्पसमा° C, J, K, कल्पसम° G1, G2. 5 °नीति C, G1, G2, J, K 6 °ं B. 7 °ना° G1, G2, J. 8 °स्येवानु° B, K, °स्येवानु° G1, G2. 9 वत्र B. 10 निध° B. 11 न° B. 12 अ° B, G1, G2, J, K. 13 °ं° B, G1, G2, J, K. 14 °दनि° G1, G2, J, K. 15 Wanting in B. 16 दरद्रुकाः B. 17 सर्पा B 18 °भवनेत्या° G1, G2; °वन्वनेत्या J. 19 °नत्वात्सिकवद् B. 20 तथा° G1, G2, J. 21 B ends here abruptly after दा. 22 भवति° C, J. 23 °णो C. 24 निधाति J. 25 वत्रैके G1, G2, J, K. 26 भवति° C, G1, G2, J. 27 K adds हि भवति. 28 दत्रे° C. 29 परवं J.

अपि वा प्रजापतीप्सामेवोपकृतं[1] स्यात् ।
तत्र खलु त्रिवृतं करोति, रथन्तरं च लघुश्चाग्नस्तोमश्चाग्नं प्रजापतिरिति ।
ज्योतिष्टोमं तन्त्रम् ।
आग्निष्टोमीं संस्थां रथन्तरपृष्ठम् ।
तत्र खलु बृहस्पतिसवं करोति ।
एषोऽग्निष्टोमस्त्रिवृत्स्तोमो रथन्तरपृष्ठो ज्योतिष्टोमतन्त्रो भवतीति न्याय-
कृतमुत्तरं न्यायकृतमुत्तरम् ॥ १३ ॥

इति निदानसूत्रे दशमः प्रपाठकः

निदानसूत्रं समाप्तम्

1 यथा० C; त्य० is suggested. 2 °सवं G1, G2, J, K.

निदानसूत्रवृत्तिः

तत्त्वसुबोधिनी

निदानसूत्रवृत्तिः

विघ्नेशं भारतीमीशमाचार्यञ्च पतञ्जलिम् ।
नत्वा निदानसूत्रस्य वृत्तिं कुर्वे यथामति ॥१॥
क्व सूत्रमतिगम्भीरं क्वैतद्वृत्त्या नु साहसम् ।
तातप्रसादः कुरुते वृत्तिं तत्त्वसुबोधिनीम् ॥२॥

अथातश्छन्दसां विचयं व्याख्यास्याम इति ।

अथशब्द आनन्तर्यार्थे । अतःशब्दो हेतोर्वृत्तत्वे । तत्र प्रतिपत्तृणामेतत्सूत्रप्रवृत्तिनियमेन यदनन्तरं तदनन्तरम् । सूत्रार्थश्च ऋक्सामसन्त्रब्राह्मणार्थरूप इति, तेषामध्ययनानन्तरं सूत्रार्थप्रतिपत्तिहेतोरध्ययनस्य वृत्तत्वात्, तेष्वनुष्ठानायार्थविशेषं जिज्ञासमानानाम्, विचयं विचीयते निर्णीयतेऽनेनेति व्युत्पत्त्या ज्ञानसाधनीभूतं सूत्रं व्याख्यास्यामः स्पष्टं करिष्याम इत्यर्थः ।

त्रयश्छन्दःपादा भवन्तीति ।

छन्दसां पादास्त्रयस्त्रिविधा भवन्ति, विधानमन्तरेणापरिमितानां पादानां त्रित्वानुपपत्तेरिति ध्येयम्; के ते त्रय इत्यत आह—

अष्टाक्षर एकादशाक्षरो द्वादशाक्षर इति ।

स्पष्टम् । अक्षरसंज्ञा ह्यचामेव, व्यञ्जनं त्वक्षराङ्गम्, न तान्यक्षराणि, "व्यञ्जनमपराङ्गं विरामे लुप्यते" इति फुल्लसूत्रे (Ph. p. 117. 5.) व्यञ्जनानामनक्षरत्वव्यपदेशात् । उक्तं च शौनकेन—

"सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् ॥" इति । RPr. 18. 32.

अनुमतश्चायमर्थ आचार्यस्य—"अच एवाक्षरम्" इति ।

यत्र ह्रस्वमक्षरमुपोत्तमं पादस्य भवति सा जागती वृत्तिः । यत्र दीर्घं सा त्रैष्टुभेति । ह्रस्वदीर्घाभ्यामक्षरस्य विशेषणादचामेव ह्रस्वदीर्घत्वादयः, तथा च पाणिनिः—

"ऊकालोऽज्झ्रस्वदीर्घप्लुतः" (Pan. 1. 2. 27.) इति ।

ननु चतुर्थोऽपि छन्दःपादोऽस्ति दशाक्षरः, तत्कथमुक्तं त्रयश्छन्दःपादा भवन्तीति । अत आह—

तन्मिश्रं दशाक्षर इति ।

तन्मिश्रम्, छान्दसं नपुंसकम्; तन्मिश्रः वेष्वन्तर्भूतो दशाक्षरः पाद इत्यर्थः। तत्रैकदशाक्षरपादे दशाक्षरपादोऽन्तर्भवति, धृतिसारूप्यात् सङ्घातसामीप्याच्च । अतएव त्रिष्वेवान्तर्भावात् पृथक् प्रतिक्रामाभिक्रामौ नोक्तौ । ननु दशाक्षरपाद इहैवान्तर्भूतः, तथाप्यन्ये सन्ति पङ्क्तिरत्नृतय इति । अत आह—

अष्टाक्षर आपश्चाक्षरतायाः प्रतिक्रामेत्यादि ।

"अर्चामि सत्यसवम्" SV. 1. 464.

इलन्तम् । तथा च पञ्चाक्षरपादादयोऽष्टादशाक्षरपादान्तास्त्रिष्वेवान्तर्भवन्तीति न प्रकारान्तरमपेक्षितमिति भावः । अक्षरार्थस्तु, अष्टाक्षर आपञ्चाक्षरतायाः प्रतिक्रामति ।

"विश्वेषाꣳ हितः" इति । SV. 1.2; 2.824; RV. 6. 16. 1.

पञ्चाक्षराणि यस्य स पञ्चाक्षरः, तस्य भावः पञ्चाक्षरता, आपञ्चाक्षरतायाः पञ्चाक्षरतापर्यन्तमष्टाक्षरः पादः प्रतिक्रामति न्यूनो भवति । अत्रोदाहरणम्—

"विश्वेषाꣳ हितः" इति । ibid.

अयं

"त्वमग्ने यज्ञानाम्" इति ibid.

गायत्र्या द्वितीयः पादः । नन्वत्र शौनकेन—

"उत्तरोत्तरिणः पादाः षट्सप्ताष्टाविति त्रयः ।

गायत्री वर्धमानेया "त्वमग्ने यज्ञानामिति ॥" RPr. 16. 24.

पादकल्पनेन द्वितीयपादस्य सप्ताक्षरत्वावगमात् कथमस्य पञ्चाक्षरत्वनिर्णयः ? उच्यते, "होता" इति पादस्य पूर्वत्रान्वयमुपगम्य द्वितीयः पादः पञ्चाक्षर इत्याह । आचार्यशौनक(स्तु) "होता" इत्यस्य 'विश्वेषाम्' इत्यत्रान्वयमभ्युपेत्य सप्ताक्षर इत्यवोचत् । अर्थवशेन पादस्य व्यवस्थेति न्यायविदः । अत्र मतभेदेन व्यवस्थितोऽस्य विकल्प इति न विरोधः । पङ्क्षरसप्ताक्षरयोरुदाहरणम्—

"मित्रमिव प्रियम्" SV. 1. 5; 2. 594; RV. 8. 84. 1.

"परमाच्चित्सधस्थात्" इति । RV. 8. 11. 7.

आचतुरक्षरतापा इत्येक इति ।

एके आचार्याः । अष्टाक्षरपादश्चतुरक्षरतायाः पर्यन्तं प्रतिक्रामति । उदाहरणम्—

"न तमंहो न दुरितम्" SV. 1. 426.

इति पङ्क्तौ, अतिद्विष इति पवनः पादः । न चैतयोरेतादृशतेति वाच्यम् ।

तथा हि

"अभि त्वा शूर नोनुमः" SV. 1. 233.

इत्यादौ बृहत्यामिव समाम्नानं स्यात् । नच तथाम्नायते, पङ्क्तिसन्निधावाम्नायते, तस्मात्प्रायः पाठाभावात्पङ्क्तिरेवेति गृह्णीम इति ।

आदशाक्षरताया अभिक्रामति ।

"वयं तदस्य संभृतं वसु" इति । RV. 8. 40. 6.

अष्टाक्षरपादो दशाक्षरपर्यन्तमभिक्रामति वर्धते । तत्रोदाहरणम्—

"वयं तदस्य" इति । ibid.

अयम्

"अपिं वृश्च पुराणवत्" इति ibid.

षट्पदाजगल्याश्चतुर्थः पादः । अस्यास्त्वष्टाक्षरपदेति लक्ष्यमिति । नवाक्षरस्य

"न देवो वृतः शूर इन्द्रः" इति । SV. 1. 196.

एकादशाक्षर आनवाक्षरतायाः प्रतिक्रामतीति ।

गतम् । अत्रोदाहरणमाह—

"यदिं वा दधे यदिं वा न" इति । RV. 10. 129. 7.

"इयं विसृष्टिर्यत आबभूव" इति ibid.

त्रिष्टुभो द्वितीयः पाद इति । दशाक्षरस्य

"पृथिव्यामतिपित्वं यदूधः" इति । RV. 10. 73. 9.

अ[आ]ष्टाक्षरताया इत्येक इति ।

एकादशाक्षरः पादोऽष्टाक्षरतायाः प्रतिक्रामति । उदाहरणम्—

"हव्या जुषस्व मेधिर" इति । RV. 3. 21. 4.

आपञ्चदशाक्षरताया अभिक्रामतीति ।

एकादशाक्षरपाद इत्यनुषङ्गः । अत्रोदाहरणम्—

"सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरि" इति । SV. 1. 460; RV. 8. 97. 13.

"तमिन्द्रं जोहवीमि" इति *ibid.*

अस्या द्वितीयः पादः । नन्वियमृक् त्रिष्टुब् भवत्वेकादशाक्षरपादचतुष्टयत्वादिति चेन्न, आचार्यस्य मतेऽष्टाक्षरादिपादत्रयापेक्षयाऽधिकस्य छन्दःपादस्याभावादभिक्रान्तैरेतैरेव पादैरछन्दोभवस्य वक्तव्यतया

"तमिन्द्रं जोहवीमि" इति ibid.

अस्मा(!)तिजगत्यपरपर्यायविगृतिप्वस्य बहुन्दत्वात्। तथा च भरतस्वामी—

"प्र वो महे मतयः" इति SV. 1. 462; RV. 5. 87. 1.

जगती।

"तमिन्द्रम्" इति। SV. 1. 460; RV. 8. 57. 13.

तादृशीति।

"वि सेनाभिर्मयमानो वि राधसा" इति SV. 1. 334; RV. 10. 23. 1.

द्वादशाक्षरस्योदाहरणम्।

"राये नो विश्वा सुपथा कृणोतु वज्री" इति SV. 1. 460.

त्रयोदशाक्षरस्य।

"न कामममतो दिनोति न स्पृत्यद्रयिम्" इति SV. 1. 441.

विपदादायां चतुर्दशाक्षरस्य।

द्वादशाक्षर आनष्टाक्षरतायाः प्रतिक्रामतीति।

स्पष्टम्। उदाहरति—

"अनूपे गोमान्गोभिरक्वाः" इति। SV. 2. 348; RV. 9. 107. 9.

"सोम उ प्राणः" SV. 2. 347.

प्रगाथे द्वितीय ऋचः प्रथमः पादः। दशाक्षरयोदाहरणम्—

"त्य सु मेषं महया स्वर्विदम्" इति। SV. 1. 377; RV. 1. 52. 1.

"चर्षणीधृतं मघवानमुक्थ्यम्" इति। SV. 1. 374. RV. 3. 51. 1.

अ[आ]ष्टाक्षरतायाः इत्येक इति।

द्वादशाक्षरपादोऽष्टाक्षरतायाः प्रतिब्रूयति। उदाहरणम्—

"अग्निनेन्द्रेण सर्वेण विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा।
सजोर्दस्रा उषसा सूर्येण च सोमं पिबतमश्विना॥"
RV. 8. 35. 1.

इति। अत्र चतुर्थः पादः।

आपोऽष्टाक्षरतायाः अभिक्रामति।

द्वादशाक्षरपाद इति शेषः। उदाहरति—

विकर्षेण

"त्वं वृत्राणि हꣳसप्रतीन्येक इत्पुरु" इति । SV. I. 248; 2. 761; RV. 8. 90. 5.

नन्वेतत्पादस्य त्रयोदशाक्षरत्वात्कथमुदाहरणमत आह—विकर्षेणेति । यकारवकार-संयोगविभागौ, तेन सह पठितत्वादिदं दर्शयति "त्वं वृत्राणि" (ibid.) इत्यादि । एतेन "द्वैधं कुर्यादसम्पूर्णे" इति (Nid. p.12 15)

वक्ष्यमाणसूत्रेण पादपूरणाय विकर्षः क्रियते । तत्रापि यकारात् पूर्वमिकारश्च प्रक्षेप्तव्य इति गम्यते । दशाक्षरमुदाहरणम्—

"अभि वो वीरमन्धसो मदेषु गाय" इति । SV. 1. 265; RV. 8. 46. 14.

"सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे" इति । SV. 1. 370; 2. 280; RV. 8. 97. 10.

"साकं वृद्धो वीर्यैः सासह्यिर्धो विचर्षणिः" इति । SV. 2. 837; RV. 2. 22. 3.

द्वादशाक्षरपादोऽष्टाक्षरपर्यन्तं प्रतिक्रामतीत्येक इत्यन्ते उदाहरति—

"अर्चामि सत्यसवꣳरत्नधामभि प्रियं मतिं कविम्" इति ।

SV. 1. 464; ÇB. 3. 3. 2. 12.

अयमेव पादः सामशाखायां "कविम्" इति पाठाभावात् षोडशाक्षरः । सकारयुक्त... "सत्यसवम्" इति पदरहितात् यजुःशाखापाठात्सप्तदशाक्षर इति बोध्यम् ।

अथातो वृत्तिप्रदेश इति ।

अथान इति वाक्योपक्रमे । वृत्तिप्रदेशो वृत्तेरुपदेशः । वृत्तिर्नाम छन्दोविज्ञानहेतुः पादानामुपोत्तमाक्षरस्य लाघवं गौरवं चास्ति, तेन लघ्वक्षरेण छन्दोविशेषज्ञापनाय वृत्तिरिति संज्ञा क्रियत इत्यर्थः ।

यत्र ह्रस्वमक्षरमुपोत्तमं पादस्य भवति सा जागती वृत्तिरिति ।

यत्र ऋचि पादस्योपोत्तमाक्षरं ह्रस्वं भवति, सेति वृत्तिविशेषज्ञापकं प्रोक्तम्, जागती जगला विज्ञापिका वृत्तिः । यथा—

"विश्वाः पृतना अभिमातरं नरः" इति । SV. 1. 370.

यत्र दीर्घं सा त्रैष्टुभेति ।

यत्र पादस्योपोत्तमाक्षरं दीर्घमेकमात्रम्, त्रैष्टुभी विज्ञापिका वृत्तिरिति । यथा—

"प्र॑ तु द्र॒व" इति। SV. 1. 523; 2. 27; RV. 9. 87. 1; PB. 11. 3. 1.

ननु,

"आ॑ जु॒होता॒ ह॒विषा॑ मर्जयध्वम्" इति SV. 1. 63.

एकादशाक्षरपादे जागती वृत्तिः स्यादिति। अत आह—

ह्रस्वाक्षरस्योपरिष्टाद् व्यञ्जनसन्निपातेऽपि गौरवमिति।

उपरिष्टाद् व्यञ्जनानां सन्निपाते हलां संयोगः, तत्पूर्वाक्षरस्य ह्रस्वस्यापि गौरवं गुरुत्वम्। तथा पाणिनिः—

"ह्रस्वं लघु" (Pāṇ. 1. 4. 10), "संयोगे गुरु" (Pāṇ. 1. 4. 11), "दीर्घं च" (Pāṇ. 1. 4. 12) इति।

अत्रोपोत्तमस्याक्षरस्य ह्रस्वत्वेऽपि गौरवबहुत्वात् त्रैष्टुभी वृत्तिर्भवतीति भावः। एवं छन्दोवृत्तिमुक्त्वा पादवृत्तिमाह—

अष्टाक्षरद्वादशाक्षरौ लघुवृत्ती, दशाक्षरैकादशाक्षरौ गुरुवृत्तीति।

लघु ह्रस्वं वृत्तिज्ञापकमुपोत्तममक्षरं ययोस्तौ तथोक्तौ। एवं 'गुरुवृत्ती' इत्यपि बोध्यम्। अत्र दशाक्षरपादस्य पृथक् छन्दःपादत्वाभावेऽपि एकादशाक्षरपादे तुल्यवृत्तिप्रदर्शनं तनुभावेन तदन्तर्भावप्रदर्शनार्थम्।

"अग्न॒ आ या॑हि वी॒तये" SV. 1. 1; 2. 10; RV. 6. 16. 10.

"अ॒भि प्रि॒याणि॑ पवते॒ चनो॑हितः" SV. 1. 554; 2. 50; RV. 9. 75. 1.

"प्र॑ तु द्र॒व॒ परि॑ कोशं॒ नि षी॑द" SV. 1. 523; 2. 27. RV. 9. 87. 1.

"पिबा॒ सोम॒मिन्द्र॑ मन्दतु त्वा" इति SV. 1. 398; 2. 277; RV. 7. 22. 1; PB. 12. 10. 1.

अष्टाक्षरादीनां पादानामुदाहरणानि। ननु छन्दांसि व्याख्यास्यन इति प्रतिज्ञाय पादानां लक्षणकथनं [कथं] युक्तमित्यत आह—

एतैः खलु छन्दांसि वर्तन्त इति।

एतैरुक्तलक्षणैः पादैर्यथायथं छन्दांसि वक्ष्यमाणानि प्रवर्तन्ते। अतः पादलक्षणकथनं नाप्रस्तुतमिति भावः। यद्यप्यतिच्छन्दस्सु त्रयोदशाक्षरादयः पादाः सन्ति, तथाप्येतैरेव पादानामतिक्लेशाक्षरसम्पत्त्यानुगुण्येन विष्टारादीन्यतिच्छन्दांसि भवन्तीति ध्येयम्। पादानां लक्षणं परिसमाप्य प्रकृतं प्रतिजानीते—

पञ्चान्येवाग्रे सप्त चतुरुत्तराणि छन्दांसि व्याख्यास्याम इति।

पञ्चानां प्रातर्माध्यन्दिनतृतीयसवनरूपं यज्ञमार्गं सवक्तुर्वर्तयति पञ्चान्येव

सप्तगायत्र्यादिजगत्यन्तानि, चतुरुत्तराण्युत्तरोत्तरं च सङ्ख्यायातिरिक्तानि छन्दांसि, अग्ने विवृत्यादिभ्यः पूर्वम्, व्याख्यास्याम इति । यद्यपि चतुरुत्तराणि पङ्क्त्यादीनि तथापि तानि पथ्यान्येवेति प्रसङ्गादुक्तानीति न दोषः ।

इति निदानवृत्तौ प्रथमः खण्डः

चतुर्विंशत्यक्षरा गायत्री, त्रिपदाऽष्टाक्षरपादा इति ।

चतुर्विंशत्यक्षरा गायत्री भवतीति । तस्या इदं लक्षणम्—त्रिपदाऽष्टाक्षरपादेति । उदाहरणम्—

"अग्न आ याहि वीतये" इति । SV. 1. 1; 2. 10; RV. 6. 16. 10.

अथापि चतुष्पदा भवति, षडक्षरपादेति ।

अथाप्यन्येनापि प्रकारेण भवति । गायत्रीप्रकारान्तरमेव दर्शयति—चतुष्पदा भवति, षडक्षरपादेति । तदुदाहृत्य दर्शयति—

तच्चापि पाङ्क्ता उदाहरन्ति—

"पेटिलालकन्ते पेटाविटकन्ते ।
तत्र किकुबद्धस्तज्जग्धृ परेहि" इति ।

तच्चापि प्रकारान्तरं पाङ्क्ताः शाखाविशेषाध्येतारः पेटिलालक इत्युदाहरन्ति । शौनकस्तु

"इन्द्रः शचीपतिर्वलेन वीळितः ।
दुश्च्यवनो वृषा सप्तस्तु सासहिः ॥" R Pr. 16. 17.

इत्युदाजहारेति । नतु त्रिपदाऽष्टाक्षरपादेत्येतावता तल्लक्षणसिद्धिः ।

अष्टाविंशत्यक्षरोष्णिक् त्रिपदैव, पूर्वाष्टाक्षरावुत्तमो द्वादशाक्षर इति ।

अष्टाविंशत्यक्षरोष्णिग् भवति । तस्या लक्षणम्—पूर्वाष्टाक्षरपादौ, उत्तमो द्वादशाक्षर इति । उदाहरणम्—

"अग्ने वाजस्य गोमतः" इति । SV. 1. 99; 2. 911; RV. 1. 79. 4.

अथ यत्र मध्ये द्वादशाक्षरा सा ककुविति ।

यत्र ऋचां मध्ये द्वादशाक्षरपादो भवति, अभितोऽष्टाक्षरौ, सा ककुप् । यथा—

"पवस्व मधुमत्तमः" इति । SV. 1. 578; 2. 42; RV. 9. 108. 1; PB. 11. 10. 3.

यत्र प्रथमः सा पुरउष्णिगिति ।

यत्र ऋचि द्वादशाक्षरपादः प्रथमः, उत्तरावष्टाक्षरौ, सा पुरउष्णिग् भवति । उदाहरणम्—

"आविर्मर्या आ वाजं वाजिनो अग्मन्" इति । SV. 1. 435.

अथापि चत्वारः समाक्षरा इत्युदाहरन्ति—

"नद्यः ओदतीनाम्" इति । SV. 2. 862; RV. 8. 69. 2.

अथाप्यन्यापि भवन्त्युष्णिक्। तस्या लक्षणम्—चत्वारः सताक्षराः पादा इति शेषः । स्पष्टमन्यत् ।

द्वात्रिंशदक्षराऽनुष्टुप्, चतुष्पदाऽष्टाक्षरपादेति ।

अष्टाक्षरपादचतुष्टयवत्यनुष्टुप् भवति । यथा—

"गायन्ति त्वा गायत्रिणः" इत्यादिः । SV. 1. 342; 2. 694; RV. 1. 10. 1.

अथापि त्रिपदा भवति ।

अन्यापि त्रिपदा भवति । कथमित्यत आह—

मध्येऽष्टाक्षरोऽभितो द्वादशाक्षराविति ।

यथा—

"पर्यू षु प्र धन्व वाजसातये" SV. 1. 428; 2. 714; RV. 9. 110. 1.

"अनु हि त्वा सुतं सोम मन्दामसि" इति । SV. 1. 432; 2. 716; RV. 9. 110. 2.

तां पिपीलिकामध्येत्याचक्षत इति ।

तामष्टाक्षरपादमप्यनुष्टुभं पिपीलिकमध्येत्याचक्षते ब्रह्मवादिनः, तथा च ब्राह्मणम्—

"पिपीलिकमध्यामु स्तुवन्ति" इति । PB. 15. 11. 8.

देवताप्याचे च पिपीलिकमध्येत्यौपनिषदमिति । पिपीलिकया मध्यमेव मध्यं पश्य इत्युक्ता, तथाऽऽचक्षत इति तदर्थः ।

मध्येज्योतिरिति बह्वृचा इति ।

सा पिपीलिकमध्या बह्वृचा मध्येज्योतित्याचक्षते । तेषामाद्यावयवमेव दर्शयति—

एष पादो यतो यतः परिक्रामेत्

निरुक्तं, तत्र यत्र यत्रेति तं पादं ज्योतिरित्याचक्षते । ननु मध्येज्योतिरित्येतत् कथं मुखं—इत्यतो मध्यान्यदिदर्शयति ।

पुरस्ताज्ज्योतिर्मध्येज्योतिरुपरिष्टाज्ज्योतिरिति ।

मध्येज्योतिषः पुनरनुक्रमेण पुरस्ताज्ज्योतिषपरिष्टाज्ज्योतिषोऽनुष्टुबर्धमुदाहरणम् । पुरस्ताज्ज्योतिषो मृग्यम्, उपरिष्टाज्ज्योतिषस्तु—

"मा कस्मै धातमभ्यमित्रिणे नो मा कुत्रा नो गृहेभ्यो धेनवो गुः ।
स्तनाभुजो अशिंष्वीः ॥" इति । RV. 1. 120. 8.

पट्त्रिंशदक्षरा बृहती चतुष्पदेति ।

अनुष्टुबपेक्षया पादाधिक्यव्यवच्छेदार्थमेवकारः । अत्र प्रथमः पादो द्वादशाक्षरो भवति । इतरे त्रयोऽष्टाक्षराः । एवं सति बृहतीत्युच्यते । तथा च पिङ्गलनागः—

"बृहती जागतस्त्रयश्च गायत्राः" P. 3. 26.
"पथ्या पूर्वश्चेत्तृतीयः ।" इति । P. 3. 27.

उदाहरणम्—

"अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः ।
त्वं तस्या मित्रहन्वधर्दासस्य दम्भय ॥" इति । RV. 10. 22. 8.

इयमेव पुरस्ताद्बृहतीति वक्ष्यते । पथ्याबृहत्याः पादस्थितिमाह—

त्रयोऽष्टाक्षरा उपरिष्टाद्द्वादशाक्षरस्तां पथ्येत्याचक्षत इति ।
अपि च स्कन्धोग्रीवीति ।

यदि द्वादशाक्षरः पाद उपरिष्टाद्भवति प्रथमद्वितीयचतुर्थास्त्रयोऽष्टाक्षरास्तां पथ्यां बृहतीं स्कन्धोग्रीवीत्याचक्षत इति । बृहतीषु इयमेव पथ्या न्याय्या भवति, न पूर्वोक्तेति भावः । यथा—

"यज्ञायज्ञा वो अग्नये" इति । SV. 1. 35; 2. 53; RV. 6. 48. 1.

अथ यत्र प्रथमो द्वादशाक्षरः सा पुरस्ताद्बृहतीति ।

स्पष्टम् । उदाहरणं पूर्वोक्तम् ।

यत्र द्वितीयः सोरोबृहती, सैव न्यङ्कुसारिणीति ।

यत्र ऋचि द्वादशाक्षरपादो द्वितीयो भवति सोरोबृहती, स्कन्धोग्रीवीति चोच्यते, न्यङ्कुसारिणीति चोच्यते । उदाहरणम्—

"मत्स्यपायि ते महः" इति । SV. 2. 782; RV. 1. 175. 1.

यत्रोत्तमः सोपरिष्टाद्बृहतीति ।

स्पष्टम् । यथा—

"विश्वाः पृतनाः" इति SV. 1. 370; 2. 280; RV. 8. 97. 10; PB. 12. 10. 2.

तृचे

"नेमिं नमन्ति चक्षसा" इति SV. 2. 281; RV. 8. 97. 12.
उभे ऋचौ ।

अथापि चत्वारो नवाक्षरा इत्युदाहरन्ति ।

"उपेदमुपपर्चनम्" इति । RV. 6. 28. 8.

अन्यापि बृहती भवति । कथं चत्वारो नवाक्षराः पादा इति—

"उपेदमुपपर्चनमासु गोषूप पृक्षयताम् ।" इति ibid.
Lc. 3. 3. 4.

सूत्रपठितानि तत्राक्षराणि विकर्षेण गणनीयानि ।

अथापि त्रिपदा भवति, द्वादशाक्षरपादा ।

"प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यम्" इति । SV. 2. 844;
RV. 9. 110. 8.

ताꣳसतोबृहतीत्याचक्षत इति ।

स्पष्टम् । तथा च ब्राह्मणम्—

"'प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यम्' इति
सतोबृहत्यो भवन्ति" इति । PB. 16. 11. 8.

बार्हतमपि तृचꣳ सतोबृहत्य इत्येवाचक्षते । यथा—

"वयं घ त्वा सुतावन्तः" इति । SV. 1. 261; 2. 214; RV. 8.
33. 1; PB. 12. 4. 3; 14. 4. 1.

बार्हतं बृहतः सम्बन्धि तृचमेकस्तोत्रसाधनीभूतम् यस्त्रयमपि सतोबृहत्य इत्येवाचक्षत
इति । यथा—

"वयं घ त्वा सुतावन्तः" इति । ibid.

तथा च ब्राह्मणम्—

"'वयं घ त्वा सुतावन्तः' इति
सतोबृहत्यो वर्षायच्छन्द आप्नुवे" इति । PB. 12. 4. 3; 14. 4. 1.

"आ त्वा सहस्रमा शतम्" SV. 1. 245; 2. 741; RV. 8. 1. 24.

"क ईं वेद सुते सचा" इति SV. 1. 297; 2. 1046; RV. 8.
33. 7; PB. 14. 10. 1.

उदाहरणम् ।

इति निदानहृदौ द्वितीयः खण्डः

चत्वारिंशदक्षरा पङ्क्तिः, पञ्चपदाऽष्टाक्षरपादेति ।

स्पष्टम् । यथा—

"स्वादोरित्था विषूवतः" इति । SV. 1. 409; 2. 355; RV. 1. 84. 10; PB. 13. 4. 16.

अथापि चतुष्पदा भवति, द्वादशाक्षरोऽष्टाक्षर इति व्यत्यास इति ।

चतुष्पदापि पङ्क्तिर्भवति, तस्या द्वौ पादौ द्वादशाक्षरौ द्वावष्टाक्षरौ, तेषां चतुर्णामपि द्वादशाक्षरोऽष्टाक्षर इति व्यत्यासः कार्यः ।

तां सिद्धाविष्टारपङ्क्तिरित्याचक्षत इति ।

एवं व्यत्यस्तपादां सिद्धाविष्टारपङ्क्तिरित्याचक्षत इति । यथा—

"न त्वावाँ अन्यो दिव्यो न पार्थिवः" इति । SV. 2. 31; RV. 7. 32. 23.

विपर्यासे विपरीता स्यात् सैवेति ।

उक्तपादव्यत्यासे विपर्यासे सति अष्टाक्षरो द्वादशाक्षर इति सैव विष्टारपङ्क्तिर्विपरीता सिद्धाविष्टारपङ्क्तिर्भवति । यथा—

"य ऋघ्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः ।
तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥" इति ।

RV. 8. 46. 12.

आस्तारपङ्क्तिलक्षणम्—

अथ यत्र पूर्वावष्टाक्षरावुत्तरौ द्वादशाक्षरौ साऽऽस्तारपङ्क्तिरिति ।

यत्र ऋचि पूर्वौ प्रथमद्वितीयौ पादावष्टाक्षरौ, उत्तरौ तृतीयचतुर्थौ पादौ द्वादशाक्षरौ, साऽऽस्तारपङ्क्तिरिति । उदाहरणम्—

"आग्निं न स्ववृक्तिभिः" इति । SV. 1. 420; RV. 10. 21. 1.

अत्र हेतुवादमाह—

आस्तीर्णाविवैतौ पङ्क्तिपादाविति ।

एतौ द्वादशाक्षरपादौ परतः स्तीर्णाविव । तदुक्तं पिङ्गलनागेन, द्वादशाक्षरावित्यनुवर्तमाने "आस्तारपङ्क्तिः परतः" इति P. 3. 40.

स्तीर्णाविति हेतौ, ततो हेतोरित्यर्थः । उदाहरणम्—

"आग्निं न स्ववृक्तिभिः" इति । SV. 1. 420; RV. 10. 21. 1.

अथ यत्र पूर्वौ द्वादशाक्षरावुत्तरावष्टाक्षरौ सा प्रस्तारपङ्क्तिः । प्रस्तीर्णाविवैतौ पङ्क्तिपादाविति ।

प्रस्तीर्णा प्रथमतः स्तीर्णा, गतमन्यत् । तदुक्तं पिङ्गलनागेन—

"प्रस्तारपङ्क्तिः पुरतः" इति । P. 3. 41.

उदाहरणम् ऋग्वेदे—

"भद्रमिद्भद्रा" इति । RV. 7. 96. 3.

अथ यत्र मध्येऽष्टाचरावभितो द्वादशाचरौ सा संस्तारपङ्क्तिः, संस्तीर्णाविवैतौ पङ्क्तिपादाविति ।

संस्तीर्णा सम्यक् बहिःस्तीर्णा विस्तृता । तथा च पिङ्गलनागः—

"संस्तारपङ्क्तिर्बहिः" इति । P. 3. 43.

स्पष्टम् । उदाहरणम् ऋग्वेदे—

"पितुभृतो न" इति । RV. 10. 172. 3.

अथ यत्र मध्ये द्वादशाक्षरावभितोऽष्टाक्षरौ सा विष्टारपङ्क्तिः, विष्टब्धाविवैतौ पङ्क्तिपादाविति ।

विष्टब्धौ विभातोऽन्तः स्तब्धाविव । गतमन्यत् । तदुक्तं पिङ्गलनागेन—

"विष्टारपङ्क्तिरन्तः" इति । P. 3. 42.

उदाहरणम्—

"अग्ने तव श्रवो वयः" इति । SV. 2. 1166; RV. 10. 140. 1.

अथ प्रगाथलक्षणमाह—

तद्यत्र सिद्धाविष्टारपङ्क्तिर्बृहत्या वा ककुभा योक्तरा भवति तं प्रगाथ इत्याचक्षत इति ।

तदिति स्तविभक्तिकं पदम् । तत्पूर्वेषु या पङ्क्तिषु मध्ये यत्र यस्यै सिद्धाविष्टारपङ्क्तिर्बृहत्या वा ककुभा योक्तरा भवति सा सिद्धाविष्टारपङ्क्तिः प्रगाथ इत्याचक्षते ब्रह्मवादिन इति । तदुक्तं शौनकेन—

"बार्हतो बृहतीपूर्वः ककुप्पूर्वस्तु ककुभः ।" इति । RPr. 18. 1.

सूत्रमपि—

"चतुरुत्तमैन्द्र बार्हताः प्रगाथा दशतयीषु" इति । Nid. p. 82. 18

उदाहरणम्—

"तुदानं ऊर्ध्वदिव्यम्" SV. 2. 26; RV. 9. 107. 5.

"पवस्व ते पवित्रे" इति च । SV. 2. 43; RV. 9. 103. 2.

आनुष्टुभा अपि प्रगाथा भवन्तीत्येके । अनुष्टुप् प्रथमा, गायत्र्यावुत्तर इति ।

आनुष्टुभा अपि प्रगाथा भवन्तीत्येके आचार्याः । तदिदं लक्षणम्—अनुष्टुप् प्रथमा, गायत्र्यावुत्तरे इति । तथा च ब्राह्मणम्—

"त एतमनुष्टुप्शिरसं प्रगाथमपश्यन्" इति । PB. 9. 1. 1.

शौनकश्च—"अनुष्टुब्द्वे च गायत्र्यावेष आनुष्टुभः स्मृतः ।" इति। RPr. 18. 3.

अत्रोदाहरणं स्वयमेव दर्शयति । यथा—

"पुरोजिती वो अन्धसः" SV. 1. 545; 2. 47; RV. 9. 101. 1; PB. 8. 5. 7; 14. 5. 5.

"आ त्वा रथं यथोतये" SV. 1. 354; 2. 1121; RV. 8. 68. 1.

"विशोविशो वो अतिथिम्" SV. 1. 87; 2. 914; RV. 8. 74. 1.

"पान्तमा वो अन्धसः" इति । SV. 1. 155; 2. 63. RV. 8. 92. 1; PB. 9. 1. 6.

अथाक्षरपङ्क्तयो विंशत्यक्षराश्चतुष्पदाः पञ्चाक्षरपादा इति ।

अथ चत्वारिंशदक्षराभ्यः पङ्क्तिभ्योऽन्या अक्षरपङ्क्तयः, तासामिदं लक्षणं—विंशत्यक्षराश्चतुष्पदाः पञ्चाक्षरपादा इति । उदाहरणम्—

"पवस्व सोम महान्त्समुद्रः" इति । SV. 1. 429; 2. 591; RV. 9. 109. 4; PB. 14 11. 5.

द्विपदामेनामेके प्रतिजानत इति ।

एके आचार्या एनामक्षरपङ्क्तिं द्विपदां प्रतिजानते । दशाक्षरपादास्तर्हि ताः

"समं स्यादश्रुतत्वात्" इति J. N. M. 10. 3. 13, 53.

न्यायात् समविभागस्योचितत्वात् । तथा च संहिताध्ययनम्—

"पवस्व सोम महान्त्समुद्रः" इत्यादिः । ibid.

पञ्चविंशत्यक्षराऽपि भवति, पञ्चपदा पञ्चाक्षरपादेति ।

पञ्चपदाप्यक्षरपङ्क्तिर्भवति, पञ्चविंशत्यक्षरा पञ्चाक्षरपादा । तथा ब्राह्मणकल्पौ "अष्टा(?अत्रा)क्षरपङ्क्तिषु ज्यैष्ठ्यकामायोक्थानि प्रणयेयुः" इति ब्राह्मणस्य कल्पः

"अग्ने तमद्याश्वं न स्तोमैः" इति । SV. 1. 434; 2. 1127; RV. 4. 10. 1.

साकमश्वमिति ।

तां पदपङ्क्तिरित्याचक्षत इति ।

तां पञ्चपदामक्षरपङ्क्तिं पदपङ्क्तिरित्याचक्षते ब्रह्मवादिन इति । तथा च पिङ्गलनागः, पञ्चक इत्यनु[वर्त]माने—

"पदपङ्क्तिः पञ्च।" P. 3. 46.

"चतुष्पदष्टौ त्रयश्च।" इति। P. 3. 47.

"अग्ने तमद्याश्वम्" SV. 1. 434; 2. 1127; RV. 4. 10. 1.

इत्यादौ त्रयः पादाः, चतुष्पदष्टौ द्वौ पादाविति तदुक्तलक्षणसङ्गतिः।

इति निदानवृत्तौ छन्दोविचितिभाष्ये तृतीयः खण्डः

चतुश्चत्वारिंशदक्षरा त्रिष्टुप्, चतुष्पदैकादशाक्षरपादेति।

गतम्। यथा—

"प्रत्नु द्रव" इति। SV. 1. 523; 2. 27; RV. 9. 87. 1; PB. 11. 3. 1.

अथ यत्रोत्तमोऽष्टाक्षरस्तां ज्योतिष्मतीत्याचक्षत इति।

यत्र त्रिष्टुभि उत्तमः पादोऽष्टाक्षरो भवति, अवशिष्टानि षट्त्रिंशदक्षराणि, सप्तधा विभागाद् द्वादशाक्षरपादास्त्रय इति गम्यते, तामेवंरूपां ज्योतिष्मतीमाचक्षते। अतएव शौनक आह—

"त्रयश्च द्वादशाक्षरा एकश्चाष्टाक्षरः क्वचित्।
सैषा ज्योतिष्मती नाम तत्रो ज्योतिर्यतोऽष्टकः ५" इति। RPr. 16. 70.

यथा—

"अग्निनेन्द्रेण" इति। RV. 8 35. 1.

पञ्चपदाऽपि भवति, चत्वारोऽष्टाक्षरा एको द्वादशाक्षर इति।

पञ्चपदापि भवति त्रिष्टुप्। तत्राः पादानाह—चत्वार इति। अत्यष्टिरूपो महाबृहतीति संकल्पाह शौनकः—

"चत्वारोऽष्टाक्षराः पादा एकत्र द्वादशाक्षरः।
सा महाबृहती नाम॥" RPr. 16. 71.

"यत्रैकपदा तु नष्यते।" RPr. 16. 72.

इत्यत्र...नाम्नि भवतीत्यर्थः (?)।

अष्टाचत्वारिंशदक्षरा जगती, चतुष्पदा द्वादशाक्षरपादैव।

स्पष्टम्। उदाहरणम्—

"अभि प्रियाणि पवते" इति। RV. 9. 97. 12.

